अथशांतिमयूखप्रारंभः॥

श्रीगणेशायनमः॥ महोमहात्समाराध्यसमाकर्ण्यगुरोर्गिरः॥ समुद्यतोनालकमेव
कुंशांतिकपोष्टिकं॥१॥अस्पष्टयाय विशेषनिर्णयकेमिनात्रानिष्टनिवारकंपापात्र
योजकवेधंकर्मशांतिकं॥क्षयादिदूरदामादावतिप्रसंगंवारयितुंनिदानकांतं॥आ
मुष्मिकानिष्टनिवर्तकंतंवारयितुंमैहिकेति॥प्रायश्चितेवारयितुंमात्रपदंप्रायश्चितं
त्वामुष्मिकेनतदनुष्ठानेप्रायश्चितोक्तश्चपापप्रयोजकत्वात्॥अनिष्टनिवर्तकत्वं
चशांतिकस्यतन्निदानपापनाशरूपसामग्रीविघटकत्वेनपुष्टिकफलकत्वंवेधंकर्मपो
ष्टिकं॥तत्रपरिभाषा॥मार्कंडेयपुराणे॥शिरस्नातश्चकुर्वीतदेवंपित्र्यमथा
पिवा॥प्राङ्मुखोदङ्मुखोवापिश्मश्रुकर्मचकारयेत्॥तत्रैव॥देवार्चनादिकर्मा
णितथाग्न्वभिवादनं॥कुर्वीतसम्यगाचम्यप्रयतोपिसदाद्विजः॥हारीतमनुः॥
प्राणानायम्यकुर्वीतसर्वकर्माणिसंयतः॥मार्कंडेयः॥संकल्पंविधिवत्कुर्यात्स्नान

दानव्रतादिकं॥देवलः॥मासपक्षतिथीनांचनिमित्तानांचसर्वदा॥उच्चरेन्नमकुर्वाणो
नतत्फलमवाप्नुयादिति॥मासपक्षतिथयःप्रयोगाधिकारिण्यस्ताःसर्वत्रापि॥यत्तुअने
कदिनसाध्यकर्मण्याद्यदिनेकसंकल्पकालानांतिथिमधिकरणत्वेनोल्लिख्यज्योतिष्टोम
नाऊंयस्यइत्यादिसंकल्पवाक्येप्रयुज्यंतेयायज्ञकाः॥तच्चपदानामन्वयायोगादनादृत्ते
यं॥यद्यपिकेचित्तेनतेनरूपणप्रयोगांगतयाविहितानामेवमासादीनांउच्चरइति॥तदपि
नमानाभावात्॥अविहितमासादिकआधानादौमासपक्षतिथीनांज्योतिष्टोमएकादशी
व्रतादौचमासपक्षयोरुच्चारणाभावप्रसंगाच्च॥अतोज्योतिष्टोमादावेकादश्यादिपूर्णि
मांतानामुच्चरः॥एवमन्यत्रापीतिदिक्॥अत्रचस्त्रीणामप्यधिकारः॥श्रावयेच्चतुरो
वर्णान्कृत्वाब्राह्मणमग्रिमइति॥आदिवाक्येश्रवणस्यतत्यर्थतयारागप्राप्तत्वेनत
द्विधोक्तस्यवैय्यर्थ्यापत्तेर्निजविवक्षयाश्रवणविधानात्तेषांपुराणश्रवणाधिकारेणज्ञान
सद्भावात्॥वैदिकमंत्राभावेकथंतद्वत्सुकर्मस्वधिकारइतिचेत्मैवम्॥धर्मप्रवक्तृ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

धर्मज्ञाः सतां धर्ममनुष्ठिताः॥ मंत्रवर्जनदुष्यंतिप्रशंसांप्राप्नुवंतिचेतिमनुनामंत्रवर्जनात्॥ यत्तुमधातिथिमंत्रवर्जितेषुपवासादिष्वधिकारार्थमिदंनतुसमंत्रकेषुमंत्रपर्युदासेनाधिकारार्थमिति॥ तत्र॥ अमंत्रकोपवासादिषुश्रवणविधिनवाधिकारसिद्धावतद्व्याख्यानर्थक्यापतेः॥ अतएवमाक्षधर्मेष्वपि॥ मंत्रवर्जनदुष्यंतिकुर्वाणाःपौष्टिकीक्रियामिति॥ अत्रैतद्व्याख्यस्यपौराणत्वेनतत्सामान्योपस्थितेपौराणक्रियाद्देशेनमंत्रवर्जनविधौपौष्टिकामुद्दिश्यविशेषणत्वेनाविवक्षितं॥ एवंचमनुवाक्यस्येतस्यचकेवश्रुतिमूलत्वेनकल्पतेऽग्र्यपरिशिष्टे॥ आदौविनायकःपूज्यअंतेतुकुलदेवताः॥ शौनकः॥ पुण्याहवाचनविधेरस्यामोक्तयथाविधिप्रयोक्तुःकर्मणामादावंतेवाद्रियेतेति॥ कर्मप्रदीपे॥ कर्मादिषुतुसर्वत्रमातरःसगणाधिपाः॥ पूजनीयाःप्रयत्नेनपूजिताःपूजयंतिताः॥ प्रतिमासुचयुद्धास्तुलिखित्वावापटादिषु॥ अर्पिवाक्षतपुंजेषुनवेध्यश्चपथग्विधेः॥ कुंभलग्नावसाधाराःसप्तवारंघृतेनतु॥ कारयेत्सर्वधारावानाति

नीवानचोच्छ्रिताः॥ आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः॥ पूज्यःपित्रभ्यस्तदनुआद्दानमुपक्रमेदिति॥ षडुत्यइति कातीयंचंद्रोगपरं॥ अन्येषांतुनवदेवतं॥ नन्वष्टकास्कंदस्कंदगयाद्यांवक्ष्यतेहनि॥ अत्रमानुषथकृआद्धंअन्यत्रपतिनासहेतिवचनात्॥ सर्वत्रावर्यायजमानसमशखीयएव॥ अन्यथाआवायेरयंयजमानस्यशाखाध्ययनाभावेनआश्वीयपदार्थानांनिर्वाहएवनस्यात्॥ स्वशाखयावानुष्ठानेतदवैगुण्यंनथाचारः॥ यस्वशाखांपरित्यज्यपरशाखांसमाश्रयेत्॥ अप्रमाणमृषिकृत्वासोंधेनमसिमज्जतीति॥ ऋत्विजस्तुभिन्नशाखीयाअपि॥ सर्वेष्वावाब्राह्मर्त्विज्योमधुपर्कपात्र्याः॥ ऋत्विग्भ्यस्त्वामधुपर्कमाहरेत्॥ इत्याश्वलायनोक्तं॥ संपूज्यमधुपर्केणऋत्विजःकर्मकारयेदितिविश्वामित्रोक्तेश्च॥ ऋत्विक्स्वशाखीयंकर्मकरोतितत्शाखोक्तेनप्रकारेणकोऽनुसंधेनमधुपर्केकारयति॥ यायज्ञकाःकेचित्॥ परेयजमानशाखीयाःकेनयजमानेनस्वशाखीयाऋत्विक्भिश्च॥ स्वशाखीयान्पदार्थाअनेकेषु

ऋत्विक्षु वा दर्शानुसमयेनानुष्ठेयाइतिनुकर्तृकं॥ तत्तच्छ्राद्धाध्ययनजन्यज्ञान
स्यांगत्वादेकप्रयोगावच्छिन्नपरिग्रहाच्च॥ ऋत्विग्भ्योदेयमुक्तंलिंगपुराणे॥ वस्त्रयु
ग्मंतथाध्वर्नंकेयूरंकर्णभूषणं॥ कंठाभरणयुक्तोनिप्रारंभेधर्मकर्मणः॥ पुरोहि
ताय दत्वार्थमृत्विग्भ्यश्चापि दापयेदिति॥ आपःपूयंतेस्मिंनिति अप्यूनंजलपात्रं॥
मत्स्यपुराणे॥ यजमानःसपत्नीकःपुत्रपौत्रसमन्वितः॥ पाश्चिमद्वारमासाद्य प्रवि
श्याग्नेयंउपं॥ संग्रहे॥ समंततश्चासिद्धार्थान्किरेद्धोमंत्रतः॥ प्रतिष्ठासारे॥
सर्वतःपंचगव्येनप्रोक्ष्ययागमंडपं॥ आपोहिष्ठेत्यृचेनैवततःस्वस्त्ययनंजपेत्॥
अत्रहेमाद्रौपुजाप्युक्ता॥ समंडपंप्रविश्याथतोरणादिप्रपूज्यच॥ वास्तुयागंत
तःकुर्यात्सादेमंडपेतथा॥ वास्तुमंडलंचनेक्रुत्यां॥ नेक्रुत्यांदिशिवास्तोश्चब्रह्मा
णश्चसमर्चयेदितिनारदोक्तेः॥ वास्तुहोमस्तुभिन्नस्थंडिलेकार्यःमुख्यायतनेवा॥ तत्रापिदोषथक्त्वयोगतयाप्रधानसंमिलनंतथावा॥ शारदातिलके

केतुहोमएवोक्तः॥ सर्वशांतिकंपौष्टिकंमहादानादिलौकिकाग्नौकार्यं॥ श्रौ
तस्मार्तयोःप्राप्तामानाभावात्॥ मनुः॥ वैवाहिकेग्नौकुर्वीतगृह्यंकर्मयथाविधिः॥
पंचयज्ञविधानंचपाकेशंचाह्निकंगृहीतित्यस्यशेषेगृह्योक्तपरंवैवाहिकइतिच॥ दा
रदाहाचगृह्यपतिमरणकालिनाग्नेरन्युपलक्षणकं॥ तत्सजातीयसंस्कारस्यैवसाधन
त्वावच्छेदकत्वात्॥ यद्यपियाज्ञवल्क्यः॥ स्मार्तंकर्मविवाहाग्नौकुर्वीतप्रत्यहंगृही॥ दा
यकालादतेवापिश्रौतंवैतानिकाग्निषु॥ इतितत्रापिसामान्यंस्मार्तंपरंगार्ह्यउपसंहिप
तं॥ एतन्नाहवनीयादयोनिरस्ताः यदाहवनीयेऽहुतीत्यादौअभ्यग्निहोत्रहोत्रादिकर्तृक
स्यैवदर्शनप्रतिपत्तिहोपस्थितेवत्॥ वैदिकहोमोपस्थितेश्च॥ यद्यप्यत्रगार्ह्यंस्मार्त
एवश्रौतंचवैतानिकाग्नेतिनियमेनस्मृत्यर्थकेपिकर्मणिश्रौतस्मार्ताग्न्योःप्राप्तिःसंभाव्यते॥
तथापिनाहवनीयावसथ्यत्वादिरूपेणकिंतुलौकिकसाधारणज्वलनत्वेनैव॥ अ
वैवाहुतिप्रक्षेपेआहवनीयत्वादिविवाक्षितत्वाच॥ अतएवसर्वाधानिनश्रौपासनाभावा
त्॥ वैतानिकाप्राप्तेश्चतेनत्यगार्ह्यलौकिकएवकार्यः॥ अमुमेवसर्वमर्थंस्मृत्यर्थसार

कृदपिसंजाग्या हागार्ह्यमोपासनेकुर्यात्सर्वाधानीतुलौकिके॥ स्मार्ते चतौकिकेकुर्याच्र
श्रौतंवैतानिकाग्निचिति॥यत्तु नारायणदतौ॥ सर्वाधानेना। सीमंतोन्नयनादिगार्ह्यक
र्मार्थमासर्तानिरुस्यादनीयइति॥तत्रमूलंवौधायनसूत्रं॥यदपिविज्ञानेश्वरोग्रह्य
इओपासनइत्यूचेतत्रमूलमन्वेष्यं॥कानीयपरंयानतत्र॥तत्सूत्रेतथाम्नानात्र॥अतए
वसविनायकश्रौतौलौकिकाग्निमेवाचोचत्र॥अतःस्मृत्यकर्तृलौकिक एवेतिदिक्॥
कृत्वरन्नाकरे॥शुभंपात्रंतुसंस्यात्तेनाग्निंप्रणयेद्बुधः॥तस्यभावेश्वरावेणनवेना
मिमुखंवचनं॥गोभिलीये॥आहृत्यचैवहोतव्योयत्रावहीतोनलः॥तथा॥लक्षहोमे
चकृच्छ्रस्यात्कोटिहोमेकृताशनः॥पूर्णाहुत्यामितोनामःशांतिकेवरदःसदा॥अन्येषु
संस्कारादिकर्मस्वग्नेर्नामविशेषाःहृषोगरन्नेतेयाः॥होमोविशेषोगोभिलीये॥न
मुक्तकेशोजकुर्यान्नापिपाति नजानुकः॥उत्तानेनैवहस्तेनअंगुष्ठाग्रेणपाणितं॥
संहितांवृत्तिपाणिस्तुवाग्यतोजुहुयाद्विरिति॥बहुकर्तृकहोमेप्रत्याहुतित्यागा
शक्तेः॥होमारंभएवसर्वदेवताश्चध्येयतेनोद्दिश्यसर्वाणिद्रव्याणित्यजेदितिहे

माद्र्यः॥इतिपरिभाषा॥अथविनायकस्तपनं॥याज्ञवल्क्यः॥विनायकःकर्म
विघ्नसिध्यर्थंविनियोजितः॥गणानामाधिपत्येचरुद्रेणब्रह्मणातथा॥तेनोपस्पृ
ष्टोयस्तस्यलक्षणानिनिबोधितः॥स्वप्नेनगार्ह्यतेसर्थंजलंमुंडश्चपश्यति॥काषा
यवाससश्चैवकृष्णदंष्ट्राधिरोहति॥अंत्यजैर्गर्दभेरुष्ट्रैसहैवत्रावतिष्ठति॥व्र
जन्नपितथास्नानंमन्यतेनुगतंपरैः॥उपस्पृष्टउपद्रुतस्वप्नेस्नोतपसाक्रियतेतत्र
मज्जतिवा॥नलवगाहनमात्रविवक्षितंरतस्यशुभसूचकत्वात्॥अंत्यजैश्चंडालैः
प्रत्यक्षलक्षणान्याह॥विघ्नाविष्कारंभःसंसीदत्यनिमित्ततः॥तेनोपस्पृष्टो
लभतेनराज्यंराजनंदनः॥कुमारीनेवभर्तारंअपत्यंगर्भगंगना॥आचार्यत्वंश्रोत्रि
यस्यनशिष्योध्ययनंतथा॥वणिक्लाभंवनाप्नोतिकृषिंवापिकृषीवलः॥सं
सीदतिकारणंविनादीनमनस्कोभवति॥एतदुपलक्षणं॥यस्ययदिष्टंसचेद
दृसामग्रीसत्वेननप्राप्नोतितदादुपद्रुतोबोध्यः॥एतदुपद्रवपरिहारार्थंकर्मा
ह॥स्नपनंतस्यकर्तव्यंपुण्याहेकृतिविधिपूर्वकं॥अत्रपुण्याहेकृतविशेषेपिविशेष

हेमाद्रौ विष्णुः॥ शुक्लपक्षे चतुर्थ्यां च वारुणधिषणस्य च॥ तिष्ये च वीरनक्षत्रे तस्यैव पुरतो न्यसेत्॥ अत्रादौ देवतापूजोक्तात्रैव॥ व्योमकेशांशुसंपूज्यपार्वभीमजं तथा॥ कृष्णस्यपितरंतातअर्कमारंसितंतथा॥ विषणंतोदपुत्रंच कोणंलक्ष्मभारत॥ विधुंतुदं बाहुलेयं स्कंदंनंदकधारणमिति॥ व्योमकेशःशिवःसितःविषणोगुरुः॥ तोदपुत्रोबुधः॥ काणःशनैश्चरः॥ लक्ष्मतद्वोश्वंद्रः॥ बाहुलेयस्कंदः॥ नंदकधारी कृष्णः॥ गोरसर्षपचन्द्येनसाज्येनोत्सादितस्यच॥ सर्वौषधैःसर्वगंधोर्वितिलाशिरसस्तथा॥ भद्रासनोपविष्टस्यस्वस्तिवाच्यद्विजाःशुभा॥ गोरसर्षपपिष्टेनगोघृतयुक्तेनोत्सादितस्यच॥ सर्वौषधानिछंदोगपरिशिष्टे॥ कुष्ठंमांसीहरिद्रेद्वेसुराशैलेयचंदनं॥ वचाकस्तूरीकुष्ठा चक्रसर्वौषध्यःप्रकीर्तिताइति॥ सर्वगंधैश्चंदनकुंकुमागरुकस्तूरीकाजातीकोल्लाद्यभिवेद्यांसितवस्त्रप्रच्छादितश्रीकर्णीपीठंकृत्वातत्रभद्रासनं॥ स्वस्तिवाचनीयाःब्राह्मणद्वारास्वस्तिवाचनंकारयेदित्यर्थः॥ अथस्नानाङ्गजस्नानाङ्ग

DR BHAU DAJI

त्मीकासंगमाद्दात्र॥ मृत्तिकांरोचनांगंधंगुग्गुलंचविनिक्षिपेत्॥ याआहृतास्त्वकर्णैश्चचतुर्भिकलशैर्ददात्॥ चमण्यानदुहेरक्तेस्थाप्यभद्रासनंततः॥ अनडुहंचर्मचवेद्योप्रागग्रीवमूर्ध्वलोममवस्थाप्यमितिविज्ञानेश्वरःयाआपःतेचत्वारोपिकलशाभद्रासनस्यपूर्वादिचक्रादिक्रमस्थाप्यइतिसांप्रदायिकाः॥ पूर्वादिदिक्रमयावस्थितकलशोदकेनाभिषेकमंत्रेणमंत्रानाह॥ सहस्राक्षशतधारमृषिभिःपावनंकृतं॥ तेनत्वामभिषिंचामिपावमानीःपुनंतुते॥ भगंतेनरुणोराजाभगंसूर्योबृहस्पतिः॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः॥ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि॥ ललाटेकेशयोरक्ष्णोरापस्तंघ्नंतुतेसदा॥ सहस्राक्षंबहुशुक्लंकं॥ पावमानीरित्यनंतरमापइतिविशेषः॥ भगंकल्याणं॥ उदकुंभेतिस्थितेनाभिषेकेपूर्वोक्तास्त्रयएवमंत्राः॥ सर्वेश्चैवमूर्धमितिविज्ञानेश्वरोक्तलिंगात्॥ किंच॥ स्नातस्यसार्षपंतैलंशुक्लवेणोर्दुंबरेणतु॥ जंघयान्मूर्धनिकुशान्सव्येनपरिगृह्यच॥ सव्यापिगृह्यतकुशांतर्हितेसर्षपंतैलमुदुंबरनिर्मितेनस्रुवेणयजमानमूर्धनिजुहुयात्॥ आचार्यः॥ मित्रश्चसंमित्रश्चैवतथाशल्यकंटकौ॥ कृष्णाजोराजपुत्रश्चैतेस्थाहासमन्विताः॥ नाभिकलमिमंत्रैश्चनमस्कारसमन्वितैः॥ नमस्वस्तिस्वाहा

चतुर्थ्यंत।।एतानि षडविनायकनामानीतिविज्ञानेश्वरः।।अपरार्के तु शालंकटइति कंटकारिसंज्ञके वचनांतंपाठः।।तेनतन्नामनेपंचैवाहुतयोभवंति।।अत्रलौकिकेग्नौस्थालीपाकविधिनाचरुंकृत्वा।।तेभ्यएवाहुतिंषडेकैकांकृत्वाइंद्रादिदेशतोकेभ्यस्तत्तन्नामाबलिंदद्यादितिमिताक्षरायांतत्रच रुहोमेइंद्रादिभ्योबलिदानेचमूलंनित्यं।।भूतेचाहासमन्वितैर्नामभिर्जुहुयात्र।।नमस्कार समन्वितैश्चमितादिभ्यएवबलिंदद्यादितिवक्ष्यमाणोनसंबध्यतेइतितुयुक्तं।।दद्याच्चतुष्पथे चर्पेकुशानास्तीर्यसर्वशः।।कृताकृतांतंदुग्धंचपललौदनमेवच।।मत्स्यान्यकोलथैयामान्मां समेतावदेवतु।।पुष्पंचित्रंसगंधिंचसुरांचविविधामपि।।मूलकंपूरिकापूपा लथैवोडेरकस्त्र जः।।दध्यन्नपायसंचैवगुडपिंडंसमोदकं।।एतान्सर्वान्समाहृत्य भूमौकृत्वाततःशिरः।। कृताकृतान्सकृदवहतान्र।।पललौदनःतिलविकृतिमिश्रओदनइतिमिताक्षरायांश्राद्धक मांसंमिश्रओदनइतितुयुक्तं।।पललंक्रव्यमामिषमितिकोशात्र।।आमान्नश्राद्धकान्मां सबलैतोदेवतु।।पक्वमपक्वंचमांसमन्यदित्यर्थः।।त्रिविधासुरागोडपेष्टीमाध्वीचामू लकंकंदकाराभक्ष्यइतिविशेषइतिमिताक्षरायां।।उभयमपिग्राह्यमितिमहार्णवे।।

अपूपाअरोलिकाःपक्वान्नविकाराइतिविज्ञानेश्वरः।।उंडेरकाःपिष्टविकाराइतिनानाबि धास्तैघृतास्तेजउच्यते।।गुडपिष्टंगुडमिश्रंशाल्यादिपिष्टं।।अत्रसुरामांसंचाब्राह्मणाविषयं।।ब्राह्मणस्तुमांससुरास्थानेसलवणपायसंदुग्धंवराटकं।।पायसंलवणंपेतेमां सस्थानेप्रकल्पयेत्र।।दुग्धंलवणसंमिश्रंसुरास्थानेप्रकल्पयेदितिस्मरणादितिमहार्ण वादिषु।।विनायकोंबिकागायत्रीभ्योंविनायकमंबिकांचनमस्कृत्यपूर्वोक्तंहोमंजा तंतयोरग्नौकृत्वोपस्थसनत्रदोषेशूर्पेसिद्धायबलिंदद्यादेतैर्मंत्रैः।।बलिंगृह्णंत्विमं देवाआदित्यासवस्तथा।।मरुतश्चाश्विनौरुद्राःकपर्णीःपन्नगायहाः।।असुरा यातुधानाश्चपिशाचामातरोरगाः।।शाकिन्योयक्षवेतालायोगिन्यःभूतनाः शिवाः।।ज्रृंभकाःसिद्धगंधर्वानागाविद्याधरानगाः।।दिक्पालाःकपालाश्च येचविघ्नविनायकाः।।तृप्तातांशांतिकर्तारोब्रह्मद्याश्चमहर्षयः।।माविघ्नमा चमेपापंमासंतुपरिपंथिनः।।सौम्याभवंतुनक्षत्राश्चभूतप्रेतासुरायहाः।।दद्या दित्यत्रापिदेहलिदीपवल्लभन्वेतिविनायकस्यजननीपुपतिष्टेत्तोक्तं।।इदं

सर्वपूजाणांरक्षार्च्यपूजनंजपेत्।।अनंतसरंविनायकमंबिकांचदुर्वांचंजपेत्मंत्रेवदत्वोपवीतेनउपस्थानमंत्रमाह।।रूपंदेहियशोदेहिभगंभवतिदेहिमे।।पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे।।हिमेभगवान्भगमित्कृत्वाविनायकमप्युत्तिष्ठेत्तिष्ठपुरुषेश्वर।।अभयमरनः।।विनायकोपस्थानंकृत्वाबिंबोपस्थानंकार्यमित्याहुःकिंच।।ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः।।ब्राह्मणान्भोजयेद्यावद्दंपत्युगमथोरपि।।गुरोराचार्यायाअपिशब्दाद्दक्षिणामपि।।एवंविधंकर्मकुर्वतःफलमुक्तं।।एवंविनायकपूजयाश्रेयोविधानतः।।कर्मणांफलमाप्नोतिश्रियमाप्नोत्यनुत्तमं।।अस्याकर्मांगत्वेनपौष्टिगत्वेनचयेचतुष्टयस्याप्यन्त्याविकारः।।शूद्रस्यतुमंत्रवर्जनाद्यत्रक्वाप्यमंत्रवर्जनदुष्यतिकुर्वाणाःपौष्टिकीक्रियामितिमाक्षधर्मेश्चवणाद्दितिवदंति।महीपालोपि।।यजमानश्चछेदइतिवदन्तस्याविकारमाचष्टेति।।।इतिविनायकशांतिः।।।अथप्रयोगः।।कर्तादेशकालौसंकीर्त्यअमुकशर्मणोदेशकालौसंकीर्त्यअमुकशर्मणोनिर्विघ्न

तासिध्यर्थंविनायकस्तपनंकारिष्यतिसंकल्पयेत्।।ततपुण्याहवाचनादिनांदीश्राद्धांतंयथोक्तंकुर्यात्।।अपरेपुण्याहवाचनंनेच्छंति।।अग्नेतस्यकर्तव्यत्वात्।।अथाचार्यंऋत्विक्चतुष्टयंवृणुयात्।।ऋत्विजोनेच्छंतीतिकेचित्।।तदाचार्यएववक्ष्यमाणमभिषेकंकुर्यात्।।यजमानःप्रतिमास्वक्षतपुंजेषुवारिवंपार्वतीगणेशंवसुदवंकेतुअर्कंभौमंशुक्रंगुरुंबुधंशनिंचंद्रंराहुंस्कंदंकलशंचावाह्यपूजयेत्।।तथाचार्यःपंचवर्णैपूर्वादिचतुर्दिक्षुचत्वारिमध्यस्थवेद्यांचैकमितिस्वस्तिकपंचकमालिख्यमध्यस्थस्वस्तिकोपर्यासनंदर्भकृष्णाजिनंप्राचीनग्रीवमुत्तरलोमसंस्तीर्यतस्योपरिश्रीपर्णीपीठंसंस्थाप्यसितेनवाससाछादयेत्।।एतद्वासनमिति।।अथचतुर्षुस्वस्तिकेषुपूर्वादिचक्रदिक्षुचत्वारोपिऋत्विजःकलशान्संस्थापयेयुःस्वाचार्योवा।।तत्रायंप्रकारः।।महीद्यौरुर्वियद्वन्तिस्मिंस्थानेसमाधयेओषधयःसमितिस्थानक्षित्वा।।आकलशंचितिनेषुकलशंसंस्थाप्यइमंमेगं

गेइतितीर्थोदकेनतस्योपरिश्रीपर्णीपीठंसंस्थाप्यपूर्यगंधद्वारामितिगंधनागरुकस्तूरीकर्पूरगोरोचना
दीनांधामुगुल्लंचनिक्षिपेत्॥याओषधीरितिसर्वौषधीः॥ओषधयःसमितियवान्॥कांडात्कांडा
दितिदूर्वा॥अश्वत्थेवइतिपंचपल्लवान्॥स्योनापृथिवीतिसप्तमृदःक्षिपेत्॥याःफलिनीतिफलं॥
सहिरत्नानितिपंचरत्नानि॥हिरण्यरूपइतिहिरण्यंयुवासुवासाइतिवस्त्रेणसूत्रेणचवेष्टयेत्॥पूर्ण
दर्वीतिधान्यपूर्णांपात्रंकलशोपरिनिदधात्॥अत्रवरुणावाहनपूजनेअग्निकोचिदाकुः॥
ततःकलशेसर्वेसमुद्राइतिगंगाद्यावाहनं॥ततःकुंभमिमंत्रणं॥कलशस्यमुखेवि
ष्णुःकंठेरुद्रसमाश्रितः॥मूलेतत्रस्थितोब्रह्ममध्येमातृगणास्मृतः॥कुक्षौतुसागराःसर्वेस
प्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशं
तुसमाश्रिताइतिततःकुंभप्रार्थना॥देवदानवसंवादेमथ्यमानेमहोदधौ॥उत्पन्नोसितयाकुंभविष्णुनाविधृतःस्वयं॥त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः॥शिवःस्वयंत्वमेवासिविष्णुस्त्वंवप्रजापतिः॥आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः॥त्वत्प्रसादा

दिमंयजमानंकुरुमेदेवेशप्रसन्नोभवसर्वदेति॥ततऋत्विजओंनोभद्रा
इतिसूक्तंपठेयुरितिकेचित्॥आनोभद्राइतिशांतिसूक्तस्यराड्गणोविश्वेदेवास्त्रिष्टुप्॥आद्याः
सप्तमीचजगत्यः॥षष्ठीविराट्शेषास्त्रिष्टुभः॥शांतिसूक्तजपेविनियोगः॥आनोभद्राःक्रतवोयंतु
पर्वतामित्यादिकंवा॥तस्मिन्नेवसमयेआचार्योभद्रासनस्थोत्तरतईशान्यांवास्त्राच्छादितपीठा
दोविनायकप्रतिमांविघ्नप्रतिमांचभग्नुत्तारणपूर्वंप्रतिष्ठाप्यषोडशोपचारैःपूजयेदितिनिबं
धकृतः॥तत्रविनायकमंत्रः॥गणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमं॥
ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं॥गणपतिर्जगतीगणपत्यावाहनेविनियोगः
ॐगणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमं॥ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं॥कृत्तिवासायविद्महेदेवकर्णायधीमहि॥तन्नोदंतीप्रचोदयादितिवा॥गौर्यैकगौरी
र्मिमायदीर्घंतमाऋषिर्गौर्यावाहनेविनियोगः॥गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी॥
अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन्॥व्यंतोपदेपरमेचन्नामन्त्सीदन्नृतस्ययोनिमासदत्॥
मालिन्येवधीमहि॥तन्नोगौरिप्रचोदयात्॥अत्रमिताक्षरायोचरुहोमोप्युक्तः॥शिलाश्चक्रुर्वे
तितस्मिन्पक्षेआचार्योग्न्युत्तारणविधिनाकुंभेस्थंडिलेवाग्निंप्रतिष्ठाप्यप्रादेशमात्रंसमिद्ध
यमादायास्मिन्होमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥इतिसंकल्प्यचक्रुषीभाज्येनैवं
तंडुलकात्रप्रधानंसमितंसमितंशालंकटंकटंकुशमंडलराजपुत्रमेतात्प्रधानदेवताऐकैक

याच्यवाङ्मुखायश्चेत्॥ शेषेण सिष्टकृतमित्याऋक्कामावादयेत्॥ अपरार्कमंतेनुपवेवाङ्मुखयज
मतेन्वाधानहोमद्वयेचतथेवानुसमधेयं॥ ततःपरिसमूहनादिचरुश्रपणांतंकृत्वागोघृतलो
लीकृतेनगोरसर्षपकल्केनत्वेनउद्वर्तितांगंसर्वौषधिचूर्णेकस्तूरीकागरुचंदनादिभिर्विलि
प्तशिरसंयजमानमाचार्योभद्रासनेउपवेशयेत्॥ ततोयजमानःस्वस्तिवाचनंकुर्यात्॥
अनंतरंरूपलावण्यशालिनीमिरूपवासिनीभिर्नीराजनंकारयेत्॥ ततोभद्रासनात्पूर्वशा
वस्थितंकलशमादायाभिषिंचेदाचार्यःमंत्रश्चयसहस्राक्षेशतधारमृषिभिःपावनेकृतं॥
तेनत्वाभिषिंचामिपावमानीपुनंतुते॥ ततोदक्षिणदेशावस्थितंकलशमादाय॥ भगं
तेवरुणोराजाभगंसूर्योबृहस्पतिरभगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुरित्यनेनाभि
षिंचेत्॥ ततःपश्चिमदिगवस्थितमादाय॥ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि॥ल
लाटेकेशयोरक्ष्णोरपस्तंभंतुत्तेसदेति॥ ततःउदक्देशावस्थितंकलशमादायपूर्वोक्तै
स्त्रिभिर्मंत्रैरभिषिंचेत्॥ बृहस्पतेशरेण्यइत्यभिमंत्राउक्ताः॥ एतद्वैपावनंस्नानंस
हस्राक्षमृषिस्मृतं॥ तेनत्वाशतधारेणपावमान्यःपुनंतुमा॥ शक्रादिदशदिक्

पालाब्रह्मशःकेशवादयः॥ आयस्तेशंतुदौर्भाग्यंशांतियच्छंतुसर्वदा॥ सुरक्षेमित्रा
नआपओषधयःसंतुदुमित्र्यास्तस्मैसंतुयोस्मांद्वेष्टियंचवयंद्विष्मः॥ समुद्रागिरयोन
द्योनुमयश्चयंतिसव्रताः॥ दौर्भाग्यंशंतुतेसर्वंशांतियच्छंतुसर्वदा॥ पादगुल्फोरुजं
घादोर्नितंबोदरनाभिषु॥ स्तनोरुबाहुहस्तांगग्रीवाआस्यंघ्रिसंधिषु॥ ना
सालललाटकर्णभ्रूकेशांतेषुयस्थितं॥ तदापोशंतुदौर्भाग्यंशांतिंयच्छंतुसर्वदा॥ इतितैरभ्य
भिषिंचेदितिकेचित्॥ चतुर्थकलशाभिषेचनएवंतेपठनीयाः॥ अथाचार्योयजमानस्यद
क्षिणमंतिष्ठन्सव्यपाणिगृहीतकुशांतर्हियजमानशिरसिऔदुंबरेणस्रुवेणसार्ध
पंतैलंजुहुयात्॥ उंमित्रायस्वाहा॥ यजमानोमित्रायेदन्नममेतित्यजेत्॥ वंसर्वत्रा
पि॥ ॐसमित्रायस्वाहा॥ ॐशालायस्वाहाउंकटंकटायस्वाहा॥ उंकुशमोडायस्वा
हा॥ उंराजपुत्रायस्वाहेति॥ अथाचार्योग्न्यर्चनादाज्यभागांतंकृत्वोचरुणाभित्रा
दिभ्यएवंजुहुयात्॥ यजमानस्रुपूर्ववत्यजेत्॥ आचार्यःस्विष्टकृदादिप्रणीतावि
मोकांतंकर्मशेषंसमापयेत्॥ यजमानस्यभिषेकशालायामिंद्रादिदशलोक

पालेभ्यो नाम्नादिक्षुचिदिक्षुचबलीन्दद्यात्॥ एतानि अग्निस्थापनचरुहोमादिकृत्वा
ल बलिदानानिमिताक्षराअनुरुध्योक्तानि॥ततोमितायएषबलिंनममेतपायसेना
माषभक्तेनवामितादिभ्योबलिंदत्वाविनायकोबिकयोरग्नःसकृदवहतनंदुलानो
मांसेनतिलपिष्टेनवामिश्रमोदनंमहत्यांसंपक्वंपयोदधिघृतोद्भवंचोक्तंत्रिविधां
सरांचब्राह्मणस्यमांसस्थानेसत्ववर्णायसंस्कृतस्थानेसत्ववर्णदुग्धंचित्रंपुष्यसर्ग
चिद्रन्यंमूलेकंदूरिकाअपूतांउंदेरकंसज्जदध्यंनंपायसंगुडमिश्रंतंदुलादिपिष्टंमो
दकंश्वपात्रेसंस्थाप्यतत्पुरुषायविघ्नहर्तिमंत्रेणविनायकायसकृभगायेदं
बिकायेनिवेदयेत्॥ततः शिरसाभूमिंगत्वापुष्पयुतमर्घ्यंतत्पुरुषायविघ्नहर्तिमं
त्रेणविनायकायसकृभगायेदंबिकायेचदद्यात्॥ततोदूर्वासर्षपपुष्पंगृहीत्वाविघ
नायकमंत्रेणविनायकंजलिंदद्यात्॥अंबिकायेतन्मंत्रेणतथैवदद्यात्॥ततो
विनायकमंबिकांचोपतिष्ठत॥मंत्रस्तु॥प्रतिमादिसर्वसामग्रीआचार्यायदद्यात्॥ततो
यथाशक्तिभूयसींदक्षिणां॥दीनानाथेभ्योदत्वायथाशक्तिबिनायकप्रीत्यर्थंअंबि
काप्रीत्यर्थंब्राह्मणान्भोजयित्वा॥संकल्प्यवायस्यस्थेत्यायुक्तान्यूनातिरिक्तंसर्वं

मस्त्वितिता-संप्रार्थ्यतैरनुज्ञातःसुहृद्भिर्भोजनं॥इतिश्रीमच्छंकरभट्टसूरिसूनुभट्ट
नीलकंठकृतौभास्करेशांतिनिमयूखेविनायकशांतिपद्धतिः समाप्ता॥अथग्रहयज्ञाः
स्कंदे॥देवदानवगंधर्वयक्षराक्षसकिन्नराः॥पीड्यंतेग्रहपीडाभिःकिंपुनर्भूमिमा
नवाः॥शनेश्चरेणसोदामोनरमांसेनयोजितः॥राहुणापीडितोराजानलोभांतो
महीतले॥अंगारकविरोधेनरामोराष्ट्रेनिवासितः॥बुधस्यनशशांकेनहिरण्यकशि
पुर्हतः॥रविणासक्षमस्कंनरावणोविनिपातितः॥गुरुणाजन्मसंस्थेनहतोराजासुयो
धनः॥शुक्रबाधयाबलिर्यांकिकूर्मेणनियोजितः॥याज्ञवल्क्यः॥ग्रहाधीनानरेंद्राणांउच्चा
यतनानिच॥भावाभावौचजगतांतस्मात्पूज्यतमाग्रहाः॥प्रयोगपारिजातउत्सवपरिमले॥का
र्यारंभेषुसर्वेषुप्रतिष्ठास्वध्वरेषुच॥नववेश्मप्रवेशेषुगतौध्यानादिकर्मसु॥आरोग्य
स्नानसमयेसंक्रांतौरागसंभवे॥अभिचारेचयकुर्याद्ग्रहपूजाविधानतः॥सोभीष्ट
फलमाप्नोतिनिर्विघ्नेननसंशयइतिश्रीकामः॥शांतिकामोवायग्रहैरेवंयेसमाचरेत्॥
दद्यादायुःपुष्टिकामोवातथैवाभिचरन्नपि॥ग्रहयज्ञास्त्रिधाप्रोक्तापुराणऋषिकोवि
दैः॥प्रथमोयुतहोमश्चलक्षहोमस्ततःपरं॥तृतीयःकोटिहोमस्तुसर्वकाम

फलप्रदः॥ यहस्यान्नरपूर्वेण मंडपंकारयेद्बुधः॥ रुद्रायतनभोक्तव्यतुरस्रमुदगूग्रवं॥
दशहस्तथाष्टौवाहस्तैःकुर्यात्विधानतः॥ तस्यद्वाराणिचत्वारिकर्तव्यानिविलक्षणे॥ स्कांदे॥
नवग्रहमथेकुंडंहस्तमात्रंसमंभवेत्॥ चतुरस्रमथोकुंडंस्त्रियोनिवक्त्रंसमेखलं॥ यो
निरेवक्त्रंयस्यतःपुत्रादिकामनायांतुयोन्याकारात्रिभवंतिचतुरंगुलविस्तारामे
खलातद्दुद्विगुणा॥ अत्रविशेषोपदेशादेकमेखला॥ वितास्तिमात्रयोनिस्यात्षट्सप्तांगुल
विस्तृताः॥ कूर्मपृष्ठोन्नतामध्येपार्श्वयोश्चांगुलोच्छ्रिताः॥ गजोष्ठसदृशीतद्वदायनाच्छिद्र
संयुता॥ मेखलोपरिसर्वत्रअश्वत्थदलसंनिभा॥ एकैकुंडंचमंडपेशानभागेउदीच्यांवेतिहेमा
द्रिः॥ अयुताद्दिहोमंप्रकुर्वतासिद्धकुंडंतन्मध्यभागेतुपूजावेदिंप्रकल्पयेदित्याह॥ अत्र
चतुरस्रमित्यनेनक्षत्रियादिपुरस्कारेणविहितानामाकारविशेषाणांस्त्रीकुंडस्यपुरस्कारे
णविहितस्ययोन्याकारस्यचनिवृत्तिः॥ योनौपुत्राःशुभंदत्तेद्वामेदुःखायाःकाम्यास्त्वाकार
स्यभवेत्सदा॥ तेषांविशेषमाहगोभिलः॥ कुंडस्यप्रागुदग्मध्यावाप्राग्यामुत्तरतोपिवा॥ चतुर
स्रंचतुर्धारंकर्तव्यंग्रहपीठकं॥ श्रीकामःपूर्वतःकुर्यात्सुखार्थेदक्षिणेनतु॥ पश्चाद्द्विज
न्मसिध्यर्थंशत्रुनाशार्थेयोनरेणतु॥ दुःखान्यांसर्वकामार्थमाग्नेयांत्वभिचारके॥ नैर्ऋत्यां

पुत्रलाभायपुरुषार्थायवेनात्विति॥ ग्रहवेदीतुकुंडिकपक्षेपीकार्या॥ वसिष्ठः॥ ऋग्वेद
इदमेवंविधंकापरितंत्रुकैः॥ अत्रैकाग्निप्रभृतीचार्यपक्षमुक्तेषांनवसंख्याकुंडेषुतत्तद्गृह्य
कारात्प्रयोगपरिज्ञातेभगवान्॥ मनोरमेश्रुवादेशाद्यथाकामंकरोतिवा॥ कृत्वातुसंस्कृ
तांप्राज्ञोग्रहस्थानंप्रकल्पयेत्॥ तन्मध्यभास्करस्थानंभवेत्पूर्वोनरबुधः॥ पूर्वस्मिन्भागवस्था
नंसोमोदक्षिणपूर्वके॥ दक्षिणस्यांकुजस्थानंराहोदक्षिणपश्चिमे॥ उत्तरस्यांगुरोस्थानमे
वंवस्थंडिलंभवेत्॥ स्थंडिलमग्न्यर्थं॥ भास्करस्यतुवृत्तंस्याच्चंद्रस्यचतुरस्रसंज्ञं॥ कुजस्यतु
त्रिकोणंस्याद्बुधस्यकारंबुधस्मृतं॥ गुरोर्दीर्घचतुष्कोणंयंचकोणंसितस्यतत्॥ वापाकारं
शनेराहोःसूर्पकेतोर्धूम्राकृति॥ नवधाविभजेदग्निंश्रोतकर्मविधानतः॥ ऋत्विजस्तुय
थायोगंकुंडेषुब्राह्मणाःपृथक्॥ अथस्त्रवेणकुर्याद्वास्त्र्यश्रंवाकरुद्रकान्॥ ऋत्विजो
ऽकुर्युःसर्वेस्रुवेणैवपृथक्॥ अष्टोनुकलशान्गृह्यसमारोपणमग्निषु॥ प्रधानाग्नौ
निधायेमानित्थंहोमंसमाचरेदितिअत्रैवंचस्थंडिलंभवेदित्यनेनस्थंडिलानांकुंडानां
चससआकारकरणंदृश्यतिवेत्यश्वोक्तं॥ ब्राह्मणाःपृथगित्यनेनवाचार्यो ब्राह्म

श्वनवेत्युक्तं॥ अत्रार्थसंक्षेपः प्रयोगपारिजाते॥ मध्यकुंडेस्मार्ताग्निं प्रणीयतत्तोनवा चार्याअष्ट
सुकुंडेष्वग्निंप्रणीयाज्यभागांतेकादिसमिद्भिर्गुडौदनादिहविर्भिराज्येनग्रहादिमंत्रैश्चरुत्वा
व्यस्तसमस्तव्याहृतिभिर्हुत्वाश्वतिलान्हुत्वापूर्णाहुतीर्हुत्वुरितिकुंडमुत्का॥स्कांदे॥तस्य
वोत्तरपूर्वेणसंस्थितंहस्तमात्रकं॥त्रिभिर्मंत्रैर्नवरत्नवेदितस्मुश्रायसंमितं॥सुस्थितंवेदिः विप्रो
मखवत्॥मात्स्ये॥दिरंगुलोच्छ्रितोविप्रःप्रथमःसमुदाहृतः॥अंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोप
रि॥द्व्यंगुलस्तत्रविस्तारःसर्वेषांकथितोबुधैः॥तत्रग्रहानाह याज्ञवल्क्यः॥सूर्यःसोमोमही
पुत्रःसोमपुत्रोबृहस्पतिः॥शुक्रःशनैश्चरोराहुःकेतुश्चेतिग्रहास्मृताः॥स्कांदे॥नवग्रहम
खेकुर्याद्विजश्चतुरःशुभान्॥अथवावैकमभ्यर्च्यविधानाब्राह्मणासह॥त्रिविधमपि
नवग्रहमुपक्रम्यवसिष्ठस्कंधोऽशब्राह्मणान्सुद्धान्दंभान्तविवर्जितान्॥तेषांमध्येश्रे
ष्ठस्माचार्यंतंप्रकल्पयेदिति॥अत्रपारिजातेनवाचार्याः॥एकत्रमाषद्रुत्विजःआचार्य
श्चेन्नवग्रहश्चथकर्तानकर्तृकंततइत्युक्तं॥आचार्यकर्मएकएवकुर्यात्॥परेत्वाचार्यंभमा
त्रं॥धेन्वाद्याग्रहदक्षिणाअपितेभ्यएवदेयाइत्युक्तं॥तदयुक्तं॥उपक्रमेएकाचार्यस्थि

राचार्यानाचार्यसमुदायेप्राणभृतउपदिष्टातीतिवह्निगर्भसमवायमात्रेणनवभ्यइत्युपसं
हारश्चोपदोषश्चेत्॥उपक्रमेतियच्चपाचार्यस्यसंस्कार्यत्वेनैकत्वमविवक्षितं॥तथाप्याचा
र्यस्यभूतब्राह्मणोपयोगाभावात्संस्कार्यत्वानुपपत्तेः॥दृतआचार्यः॥स्वकर्मकुर्यादिति॥
कल्पितेवाक्येउपादेयत्वादाचार्यस्यभवत्येवकर्तृत्वंविवक्षितं॥उपपादितंवेदमध्वर्युंवृणी
तेहोतारंद्रविणोदइत्यत्रमिश्रैः॥जगन्मूर्गोत्रमग्निश्चवर्णास्थानमुखानिच॥योज्ञात्वागुरु
तेषांनिग्रहस्तेनावमानिताः॥तत्रवर्णजन्मनीआहदामोदरीयेकथापाराशरः॥रक्तः क
श्यपजोभानुःशुक्रोब्रह्मसुतःशशी॥रक्तोरुद्रःस्मृतोभौमःपीतःसोमसुतोबुधः॥पी
तोब्रह्मसुताचार्यःशुक्रश्चभृगुदूहः॥कृष्णःशनीरविसुतःकृष्णोराहुःप्रजापते॥कृष्णःकेतुःकृशानूत्थःकृष्णाछायापयास्त्रियो—मी॥स्कांदे॥उसंनोर्कःकलिंगेषु
यमुनायांचचंद्रमाः॥अंगारकस्त्ववंत्यांमागध्यांहिमांशुजः॥सिंधवेषुगुरुर्जा
तःशुक्रोभोजकटेतथा॥शनैश्चरस्तुसौराष्ट्रेराहुर्वैशाटिनोपरि॥अंतर्वेद्यांतथा
केतुरित्येतामहंभ्रमयन्॥यस्ययस्यचयत्रंतत्तेवक्ष्यामृतापरं॥आदित्यःक

श्यपो गोत्रि आत्रेयश्चंद्रभा भवेन्नृ॥ भारद्वाजो भवेद्भौमस्तथात्रेय श्चसोमजः॥ शुक्रः कपूज्यो गिरसो गोत्रः शु
क्रोवे भार्गवस्तथा॥ शनिः कश्यपएवाथरा कुपेटी नस्तथा॥ केतवोजैमिनयाश्चग्रहाग्निस्तदनंत
रं॥ आदित्यः कपिलोनाम पिंगलः सोमउच्यते॥ धूमकेतुस्तथाभौमो जाठराग्नि र्बुधस्मृताः॥ गुरु
श्चैव कशिखीनाम शुक्रो भवति हाटक॥ शनैश्चरो महातेजा राहुकेत्वो र्दुतीशनः॥ एतानियह
विशेषतोग्निर्नामानि॥ कर्मविशेषतोपि देवीपुराणे॥ शुभोग्रहविधोक्तग्नि र्लक्षहोमेपराजि
त॥ कोटिहोमोशिवोवह्निः सर्वकामप्रदायकः॥ कविर्लक्षहोमेतु वह्निस्या त्कोटिहोमे
कृताशनइति॥ स्कंदे॥ भास्करांगारकोरक्तो श्वेतोशुक्रनिशाकरो॥ सोमपुत्रोगुरुश्चैवता
युभोपीत कोस्मृतौ॥ कृष्णंशनैश्चरंविद्याद्राहुं चित्राश्वकेतवः॥ मध्येतुभास्करंविद्याद्राहुं
दक्षिणपश्चिमे॥ पश्चिमोत्तरतःकेतुः स्थाप्यावेशक्रतंडुलैः॥ अथवावर्णकैःकार्याः का
र्यास्वर्णादिधातुभिः॥ यास्तवत्क्वयः॥ ताम्रकास्फटिकाद्रक्तचंदनास्वर्णजावुभौ॥ रत्ना
दयस्तुसीसात्कंस्यात्कार्यंग्रहास्तथा॥ वसिष्ठः॥ वोधायनस्तुसूर्यांगारकशुक्रबृहस्पतयइत्याह॥ स्कंदे॥ भानुश्चमंडलाकारंसोमंतुचतुरस्रकं॥ अंगारकंत्रिकोणंच
यथारुचिप्रमाणेनप्रतिमाकल्पयेत्सुधीः॥ अत्रसर्वत्रग्रहाणांसूर्यादिक्रमःस्पष्टः॥

बुधंबाणाकृतिंतथा॥ दीर्घेचतुरस्रंगुरुंपद्मवत्स्रंभार्गवंतथा॥ धनुस्कंधंशनिंविंद्याद्राहुंशूर्पाकृतिंतथा॥ ध्वजाकाराकेतवश्चगणेशंतत्रस्वरूपिणं॥ स्वरूपिणंहस्तयादाक्षवयवयुक्तं॥ स्व
पयेच्छुक्रतंडुलैर्वर्णकैर्ग्रहस्वरूपंतत्क्षयोमंडलाकारयेतिहेमाद्रिः॥ तत्रैव॥ शु
क्रोकोप्राङ्मुखोज्ञेयोगुरुसोम्यावुदङ्मुखौ॥ प्रत्यङ्मुखः शनिः सोमःशेषादक्षिणगतो
मुखा॥ इदंचशुक्रादीनांप्राङ्मुखत्वादि॥ आदित्यादिमुखाः सर्वेइतिमात्स्यादिया
भिमुख्यत्वेनविकल्पते॥ यत्तुहेमाद्रिर्विकल्पपरिजिहीर्षयाप्राङ्मुखावुर्ध्वदृशौप्रत्य
ङ्मुखोधोदृष्टिर्दक्षिणतोमुदक्षिणदृष्टयइतिआवष्टे॥ तत्रमूर्तंविधिंत्यविरोध
तादवर्ण्यचतुर्वर्णरूपगुणेयुक्तान्न्यसेत्सावाहयेत्तुतान्॥ मात्स्ये॥ पुण्याह्निकविप्र
कथितेकृत्वाब्राह्मणावाचनं॥ अग्निप्रणयनंकृत्वावेद्यासावाहयेत्सुरान्॥ देवानां
तत्रंसंस्थाप्यानिशतिद्वादशाधिकान्॥ आदित्याभिमुखाःसर्वेसाधिप्रत्यधिदेवताः॥
विष्णुधर्मोत्तरे॥ अतःपरंप्रवक्ष्यामियोदेवोयोग्रहस्मृतः॥ अग्निरर्कःस्मृतःसोमोवरुणः
परिकीर्तितः॥ अंगारकःकुमारश्चबुधश्चभगवान्हरिः॥ बृहस्पतिःस्मृतःशुक्रःशुक्रो

देवी चपावती॥ प्रजापतिः शनिश्चेश्वरादुर्ग्ये योगाधिपः॥ विश्वकर्मा स्मृतः केतुर्यंत्र हास्ते सुरास्तु
ताः॥ अतएवाग्न्यादिलिंगका मंत्राः सूर्यादिस्थापनउन क्रोः॥ अग्निदूतं दिनेशाय सूर्यायास्मं
नरत्यपिास्यो नारुथिवीभोमायरुद्रं विष्णुबुधायच॥ इंद्रआंगिरसेज्याय शुक्रज्योतिःस्क
नायच॥ प्रजापतेतिसोराय आयंगौरितिराहवे॥ केतवेब्रह्मयज्ञानंस्वःस्वर्मंत्रेप्रतिष्ठिताः॥
एतेषांचमंत्राणांआहसावाहयेतुतानित्युक्तामिर्व्याहृतिभिराहवेनविकल्पः॥ मदनस्यावा
हनस्थापनयोर्मदाद्याहृतिभिरावहनं॥ एतेमंत्रेस्थापनमित्यर्चे॥ पारिजातेवामनरुद्र॥ प्र
णवंतदितरुक्त्वाभूर्भुवस्वस्तत्परः॥ चतुर्थ्यानामसंयुक्तंनमस्कारांतयोजितं॥ एषमंत्रःसमा
ख्यातोग्रहपूजाविधौनृणां॥ आसनावाहनंकुर्यादितनेनविसर्जनमित्यर्चे॥ अत्रावाहनवाक्येषुविशेषाम
हबोधायनः॥ किरीटिनंपद्मासनंपद्मकरंपद्मगर्भसमद्युतिंसप्ताश्वंसप्तरज्जुंकलिंगदेशजंकाश्यप
गोत्रंविश्वामित्रऋषिंत्रिष्टुप्छंदसंसिंहस्थंरक्तांबरधरंचतुर्भुजमेषगमनंरक्ताभरणभूषि
तंरक्तगंधानुलेपनंरक्तध्वजपताकिनंमुकुटकेयूरमणिशोभितंआरुह्यरथंदिव्यंमेरुंप्रदक्षिणीकु
र्वाणंग्रहमंडलेप्रविष्टमधिदेवताग्निसहितंरक्तरत्नमंडलेपूर्वमुखमादित्यमावाहयामि॥ रक्तमाल्यां

बरंरक्तशूलगदाधरंचतुर्भुजमेषगमनंस्वर्णवर्णमवंतीदेशजंवासिष्ठगोत्रंजामदग्न्यार्षंजग
तीछंदसंरक्तांबरधररक्ताभरणभूषितंरक्तमाल्यानुलेपनंरक्तध्वजछत्रपताकिनंमुकुटकेयूरमणि
शोभितंआरुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवभूमिसहितंप्रत्यधिदेवतांस्कं
दसहितंत्रिकोणंरक्तमंडलेदक्षिणामुखमंगारकमावाहयामि॥ किरीटिनंश्वेतवर्णंचतुर्भुजंदंडि
नंवरदंकाव्यंसाक्षसूत्रकमंडलुंकीवटदेशजंभार्गवगोत्रंजशौनकार्षंपंक्तिछंदसंश्वेतांबरधरंश्वे
ताभरणभूषितंश्वेतगंधानुलेपनंश्वेतध्वजछत्रपताकिनंमुकुटकेयूरमणिशोभितंआरुह्यरथं
दिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतेंद्राणीसहितंप्रत्यधिदेवतेंद्रसहितं
शुक्लपंचकोणमंडलेप्राङ्मुखंभगवंतंशुक्रमावाहयामि॥ किरीटिनंश्वेतांबरधरंदशाश्वंश्वे
तभूषणंपाशाक्षसूत्रपाणिंदैत्यगुरुंवनायुदेशंजमंत्रिगोत्रंभार्गवार्षमानुष्टुप्छंदसंश्वेताभरणभूषितंश्वे
तगंधानुलेपनंश्वेतछत्रपताकिनंमुकुटकेयूरमणिशोभितंआरुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडले
प्रविष्टमधिदेवतासहितंप्रत्यधिदेवतोमासहितंचतुरस्रमंडलेप्रत्यङ्मुखंसोममावाहयामि॥ किरीटिनं
पीतमाल्यांबरधरंपीतवर्णंकर्णिकारसमद्युतिंखड्गचर्मगदापाणिंसिंहस्थंवरदंमगधदेशंजमत्रिगोत्रं

गोत्रंभारद्वाजार्षेयत्रिष्टुप्छंदसंपीतांबरधरंपीताभरणभूषितंपीतगंधानुलेपनंपीतछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितंआरुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतासहितंप्रत्यधिदेवताविष्णुसहितंपीतवर्णमंडलेउदङ्मुखंबुधमावाहयामि॥ किरीटिनंपीतवर्णंचतुर्भुजंदंडिनंवरदंसाक्षसूत्रंकमंडलुंसिंधुदेशजंमांगिरसगोत्रंवासिष्ठार्षमनुष्टुप्छंदसंपीतांबरधरंपीताभरणभूषितंपीतगंधानुलेपनंपीतछत्रध्वजपताकिनंमुकुटकेयूरमणिभूषितंआरुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतांद्रसहितंप्रत्यधिदेवताब्रह्मसहितंपीतदीर्घचतुरस्रमंडलेउदङ्मुखंगुरुमावाहयामि॥ किरीटिनंमिंद्रनीलसमद्युतिंश्मश्रुलवरद्गृध्रवाहनसयाणबाणासनधरंसौराष्ट्रदेशजंकाश्यपगोत्रंजभार्ग्वार्षेगायत्रीछंदसंकृष्णांबरधरंकृष्णाभरणभूषितंकृष्णगंधानुलेपनंकृष्णछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितंमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतांप्रजापतिसहितंप्रत्यधिदेवतायमसहितंकृष्णधनुर्मंडलेप्रत्यङ्मुखंशनैश्चरमावाहयामि॥ १५

किरीटिनंकरालवदनंखड्गचर्मशूलधरंसिंहासनस्थंपूर्वदेशजंपाटलिगोत्रमांगिरसार्षमनुष्टुप्छंदसंकृष्णांबरधरंकृष्णाभरणभूषितंकृष्णगंधानुलेपनंकृष्णछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतासर्यसहितंप्रत्यधिदेवताकालसहितंकृष्णाश्वंमंडलेदक्षिणासुखंराहुमावाहयामि॥ धूम्रान्रद्विजवाहनान्पाशाद्यरान्विकृताननान्रथवाहनान्किरीटिनोमध्यदेशजान्जैमिनिगोत्रजान्गौतमार्षान्नानाछंदसश्चित्रांबरधरांश्चित्राभरणभूषितान्चित्रगंधानुलेपनान्रूक्ष्णापिंगध्वजपताकिनोमुकुटकेयूरमणिशोभितान्आरुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणान्ग्रहमंडलेप्रविष्टान्अधिदेवताव्रत्यसहितान्प्रत्यधिदेवताचित्रगुप्तसहितान्रूक्ष्णापिंगध्वजमंडलेदक्षिणासुखान्वेत्रनावाहयामि॥ स्कंद॥ इश्वरोविंधादुमान्नशाकरे॥ स्कंदमंगारकेविंधादुधेनारायणंविदुः॥ गुरोवेदनिधिंविंधाच्छुक्रेशुक्रोविधीयते॥ शनेश्चरेयमंविंधाद्राहोकालंतथैवच॥ चित्रगुप्तोधियःकेतोरित्येतेग्रहदेवताः॥ वेदनिध्यब्रह्मणः॥ नत्रैव॥ वह्न्येसूनादिदेवानामीश्वरादियथाक्रमं॥ सर्यस्येवोत्तरेशंभुमांसोमस्यदक्षिणे॥ स्कंदमंगारकस्येवदक्षिणस्यांनिवेशयेत्॥ सौम्यासाध्विमतोविष्णुंब्रह्माजीवस्यपर्वतः॥ इंद्रमैत्रांतिताद्धिषिमंदादग्नेयतोयमं॥ राहोःपूर्वोत्तरेकालंसर्वभ्र

तत्रायावह॥ केतोर्नैर्ऋतादिग्भागेचित्रगुप्तंनिधापयेत्र॥ स्कांदे॥ अतःस्नापनमंत्राश्चकथयाम्यनुपूर्वशः॥ ईश्वरंत्र्यंबकंचेतिश्रीश्चतेचेतिपार्वती॥ यदक्रंदेतिचस्कंदंविष्णुंविष्णोररादिति॥ आब्रह्मन्निति ब्रह्माणंसजोषाइतिवासवं॥ यमायत्वेतिचयमंकालंकार्षिरसीतिच॥ चित्रावसोरिति ऋममितिअन्ये॥ राहुमंदादिनिष्ठानांउत्तरस्यांयथाक्रमं॥ गणेशंदुर्गांवायुंचराहुकेत्वोश्चदक्षिणे॥ आकाशमाग्निनोवेत्तिपंचैतान्स्नापयेद्बुधइतिसंग्रहवचनानुसारेणेतिपितामहचरणाः॥ रूपंनारायणश्च॥ स्कांदे॥ उत्तरेशनिसूर्याभ्यांगुरुकेत्वोस्तिमंत्रेणाचित्रगुप्तंनिधापयेत्र॥ अग्निरापःक्षितिर्विष्णुरिंद्रश्चेंद्राप्रजापतिः॥ सर्पाब्रह्माचनिर्दिष्टाअधिदेवायथाक्रमं॥ अग्निंदूतमितिचयमंत्रेर्वरुणस्योदुत्तमं॥ स्योनापृथिवीमितिदेन्याइदंविष्णुस्फविष्णवे॥ इद्धायेंदोइतोइस्योत्तमंपर्णेशचीस्थितो॥ प्रजापतेप्रजेशस्यएषब्रह्मेतिवेधसे॥ संत्रोनमोस्तुसर्पेभ्यःसर्पाणांस्नापनेमतं॥ ग्रहादेवाधिदेवानांनैवेद्यंकुसुमानिच॥ ग्रहयज्ञान्नदानंस्नापनंचानुपूर्वशः॥ अत्रसूर्यादयोग्रहेश्वरादयोदेवाअग्न्यादयोधिदेवताः॥ तत्रेश्वराधिदेवानांसूर्यस्योवाचरेशंभुमित्यादिनापूर्वस्थानान्युक्तानिअग्न्यादयोधिदेवास्तुग्रहदेवयोर्मध्येस्थाप्याः॥ त

डाक्टर आफ्रेक्ट संग्रहालय

यावमदनंरत्नेगोमिथुनवासिष्ठोयहदेवयोर्मध्येअधिदेवान्निधापयेत्र॥ तत्रैवसंग्रहेनुईश्वरादयोदेवाअधिदेवतात्वेनभवंतिताः अग्न्यादयस्तुप्रत्यधिदेवतात्वेनतेषांस्थानांतरंचोक्तं॥ अधिदेवादक्षिणतोवामेप्रत्यधिदेवताः॥ स्थापनीयाःप्रयत्नेनमाहतिभिःपृथक्पृथक्॥ तत्रैववासिष्ठीयेनुदेवतानांस्थानांतरंक्वचिन्मंत्रांतरंचोक्तंरुद्रंत्र्यंबकमितिमंत्रेणरुद्रेरुत्तरतोन्यसेत्र॥ सोमस्यग्नेयदिभागेश्रीश्चतेमनकात्मजं॥ यदक्रंदेतिभौमस्यस्कंदयाम्येप्रदापयेत्र॥ विष्णुंविष्णोररादितियजेस्पूर्वायुधस्यच॥ गुरोरुत्तरतोभ्यर्चेब्रह्माब्रह्मेतिमंत्रतः॥ सजोषेद्रेतिशुक्रस्यप्राच्यांशुक्रंनिधापयेत्र॥ शनेःपश्चिमतस्थाप्योयमायत्वेत्यर्चायमः॥ कार्ष्णिरसीतिमंत्रेणराहोःकालंतथोत्तरे॥ चित्रगुप्तंतुकेतूनांचित्रायस्वेतिनेऋते॥ यहाश्चदेवताख्याताश्चत्वारोधिदेवताः॥ अग्निरापोधराविष्णुरिंद्रेंद्राणीप्रजापतिः॥ सर्पाब्रह्माचनिर्दिष्टाआधिदेवायथाक्रमं॥ यहंदेवतयोर्मध्येअधिदेवान्नियेशयेत्र॥ एतानिचवासिष्ठीयवचासिकौश्चित्तादृश्यंते॥ पारिजाते॥ पद्मप्राग्दलमारभ्यदलाग्रेषुक्रमान्यसेत्र॥ इंद्रादि

लोकपालाश्चतत्तन्मंत्रैःप्रपूजयेत्॥ विनायकंतथादुर्गांवायुमाकाशमेवच॥ आवाहयेद्या
हृतिभिस्तथैवाश्विकुमारकौ॥ एतेवविनायकाद्याःपंचग्रहेभ्यइत्युत्तरतःस्थाप्याइतिसांप्रद
यिकाः॥ दक्षिणाग्न्यश्विमवायव्योत्तरपूर्वेषुयथाक्रममितिअन्ये॥ राहुमंदद्विनेशानामुत्तरस्या
यथाक्रमं॥ गणेशदुर्गावायुश्चराहुकेत्वोश्चदक्षिणे॥ आकाशमश्विनोचेतिपंचैतान्स्था
पयेद्बुधइतिसंग्रहवचनानुसारेणेतिपितामहचरणारूपनारायणश्च॥ स्कंदे॥ उत्तरेश
निसूर्याभ्यांगुरुकेत्वोश्चदक्षिणे॥ गणाधिपप्रतिष्ठाप्यसर्वदेवनमस्कृतं॥ रविशनिके
तुगुरूणांमध्यमइतिपलितार्थः॥ विनायकपदमुपलक्षणं॥ तेनदुर्गादेयाप्यत्रैवस्थाप्याइ
तिकेचित्॥ वंदनादिनियमस्तत्रैव॥ दिवाकरकुजाभ्यांहिस्थापयेद्रक्तचंदनं॥ चंद्रेचभार्ग
वेचैवसितवर्णंप्रदापयेत्॥ कुंकुमेनतुसंयुक्तंचंदनंजावसोम्ययोः॥ अगरुंचंदनंद्या
द्राहुकेत्वर्कजेषुच॥ ग्रहवर्णानिपुष्पाणिगायत्र्याधूपमादिशेत्॥ रवेःकंडुरकंधूपंशशि ७
नस्कुघृताक्षतान्॥ भौमेसर्जरसंचैवअगरुंचबुधेस्मृतं॥ सिंहकंगुरवेदद्याच्छुक्रेवि

लायुरुंतथा॥ गुग्गुलंमंदचारेतुलाक्षारोहाश्वकेतवे॥ कुंकुमकःसफ्फाकीनिर्यासःसिल्हकंसि
ल्हारुतिमध्यदेशेप्रसिद्ध॥ बिल्वागुरुंबिल्वफलनिर्याससहितमेगुरुं॥ मंदचारःशनिः॥
उद्दीप्यस्वेतिमंत्रेणदीपंदद्यादतंद्रितः॥ विहितगंधधूपदीपादिनामसंभवेत्॥ याज्ञवल्क्यः
यथावर्णंप्रदेयानिवासांसिकुसुंभानिच॥ गंधांश्चवल्क्यश्चैवधूपोदेयश्चगुग्गुलः॥ स्कं
दे॥ गुडोदनंरवेर्दद्यात्सोम्यायघृतपायसं॥ लोहिताय हविष्यान्नंबुधायक्षीरवाष्टिकं
दध्योदनंगुरोर्दद्याच्छुक्रायचघृतौदनं॥ मिश्रितंतिलमाषैश्चनैवेद्यंतुशनेश्चरोः॥ राहो
र्मांसोदनंदद्यात्केतोश्चित्रौदनंतथा॥ चित्रौदनंतिलतंदुलमिश्रितंस्यादजाक्षीरंचशोणि
तं॥ कर्णनासाग्रहीतंस्यादन्नंचित्रौदनंस्मृतमिति॥ दामोदरः॥ एतेरवेर्द्वयेश्चब्राह्मणा अ
विभोज्याः॥ तथाचयाज्ञवल्क्यः॥ गुडोदनंपायसंवहविष्यंकरवाष्टिकं॥ वसिष्ठः॥ उपचा
राणिसर्वेषांअपिशुक्लानिवाक्षतैःसदा॥ गंधाभावेशुक्लगंधपुष्पाभावेसुगंधकं॥ धूपा
भावेगुग्गुलस्याद्द्रव्याभावेतुमिश्रकं॥ पंचामृतंगवामेवमिश्रकंनकदाचनेति॥ मात्स्ये॥

प्रागुत्तरेणतस्मा च दृध्यक्षतविभूषितं॥ घृतपूपसंयुक्तंफलवस्त्रयुगान्वितं॥ पंचरत्न
समायुक्तंपंचभगंपुरंस्तथा॥ स्थापयेदग्रणकुंभंवरुणंतत्रविन्यसेत्॥ गंगाद्याःसरितःसर्वा
समुद्राश्चसरांसिच॥ गजाश्वरथ्यावल्मीकसंगमाश्रद्गोकुलात्॥ मृदमानीयविप्रेंद्र
सर्वौषधिसमन्वितं॥ स्नानार्थंविन्यसेत्तत्रयजमानस्यधर्मवित्॥ याज्ञवल्क्यः॥ अर्कःपलाश
शंखवदिरअपामार्गेथिपिप्पलः॥ उदुंबरःशमीदूर्वाकुशाश्चसमिधाक्रमात्॥ ईश्वरादिदेवता
नांस्वस्वग्रहसमिद्भिर्वहोमः॥ हिमाद्रौदेविपुराणे॥ गणाधिपत्तयेदद्याप्रथमादुवराकृतिः॥
अथान्यैवफलंविप्रभवतीहनसंशयइति॥ आश्वलायनः॥ ऋग्भ्यात्समिदाज्येनाभिऋग्भि
र्यथाक्रममितिसमित्समित्स्कविशेषमाहयाज्ञवल्क्यः॥ होतव्यामधुसर्पिर्भ्यांदध्नाक्षीरेण
वायुतइति॥ नचात्रसप्रतिपन्नदेवनाकेसार्तकर्मण्येनेकद्रव्यकेएथगेवहोमइतिसांप्रदायिकाः
बहुषुकर्मसुप्रायोवचनान्न्यूनंवा॥ स्कांदे॥ आकृष्णेनसहस्रांशोरिमंदेवानथेंदवे॥ अग्नि
मूर्धेतिभौमायउद्बुध्यस्वबुधायच॥ बृहस्पतेतिगुरोःशुक्रायांनास्परिस्तुतः॥ शनैश्च १८
रस्यमंत्रोयंशंनोदेवीरुदाहृतः॥ कयानइतिराहोश्चकेतुंकृण्वंश्चकेतवे॥ स्कांदे॥

आवोराजेतिचरुस्यबलिहोमंसमाचरेत्॥ आपोहिष्ठेत्यमायास्कस्योनेतिस्वामिनस्तथा॥
विष्णोरिदंविष्णुरितिस्वामिस्तेतिस्वयंभुवः॥ इंद्रमिद्देवतातयइतींद्रस्यप्रकीर्तितः॥ का
लस्यब्रह्मजज्ञानमितिमंत्रःप्रशस्यते॥ चित्रगुप्तस्यचाज्ञप्तमितिपौराणिकाविदुः॥ अग्निं
दूतंवृणीमहइतिवह्नेरुदाहृतः॥ उदुत्तमंवरुणेतिअपामंत्रःप्रकीर्तितः॥ मित्रोःपृथिव्योंत
रिक्षमितिदेवेषुपठ्यते॥ सहस्रशीर्षापुरुषइतिविष्णोरुदाहृतः॥ इंद्रायेदोमरुत्वतइति
शुक्रस्यशस्यते॥ उत्तानपर्णेसुभगेइतिशव्याःसमाचरेत्॥ प्रजापतेःयुनर्होमःप्रजापत
इतिस्मृतः॥ नमोअस्तुसर्पेभ्यइतिसर्पाणांमंत्रउच्यते॥ एषब्रह्मायऋत्वियइतिब्रह्मण्युदाहृ
तः॥ विनायकस्यचातनइतिमंत्रोबुधेस्मृतः॥ ज्ञानवेदसेसुनवामसोमइतीमंत्रोउच्यते॥
पूर्णाहुतिंचमूर्धानंदिवइत्यभिपानयेत्॥ स्कांदे॥ नैवेद्यशेषंकृत्वाचहोममंत्रादनंतरं॥
अथव्याहृतिभिर्हुत्वाएकैकस्यथाक्रमं॥ अष्टोत्तरंचसहस्रंशतमष्टाधिकंतथा॥ अष्टा
विंशतिरष्टौवाएकैकस्यतुहोमयेत्॥ होतव्यंचघृतंतत्रचरुर्लक्षादिकंपुनः॥ मंत्रेदशांकुवि

ईत्वा होमो व्याहृतिभिस्मृतः॥ अथेति॥ अथवत्येथग्रहीत्वातामथांबिकामितितन्त्र॥
मथनस्त्वथवेत्यपाठ॥ तत्तन्मंत्राणां व्याहृतीनां चपरस्परंविकल्प्य अष्टोत्तरसहस्रादिसंख्या
तुपक्षद्वयेपि॥ नैवेद्यंशेष होमस्तुशारवाविशेषपरइति अपिसएव॥ लक्षादिकः पुनर्व्याहृ॥ ति
भिहोमोमंत्रैरीशादुतीईत्वास्मतइत्यन्वयः॥ मंत्रैर्ग्रहमंत्रैः॥ व्याहृतिभिर्व्यास्ताभिः समस्ताभिश्च
॥ समस्ताभिश्च॥ तातचरणास्त॥ अथव्याहृतिभिर्हुत्वेतिपृथक्वाक्यं॥ एकैकस्येतिदेवतमशादिसंख्या
न्वयार्थं॥ एकैकस्यतुहोमयेदित्येकैकपदंतुचर्वादिद्रव्यपरं॥ नदेवतापरं॥ अस्मिन्नेवहोमे घृतचरुद्र
व्यविधिरग्ने॥ लक्षादिकद्रव्यंतत्तन्मंत्रैरभ्याहृतिभिर्हुत्वेतिविहितहोमेलक्षादिसंख्याविध्यर्थं॥ मंत्रैरित्या
दिचरुहोमान्तरंसोमंराजानमितियथाप्रकृतिसिद्धंकृत्वासूर्यादिमंत्रैर्दशदशाहुतीः प्रतिदेवंल
क्षहोमादिद्रव्येणकृत्वाव्याहृतिभिर्लक्षहोमादिकार्यंसाधुः॥ यवाद्यन्यतमद्रव्येणद्रव्यादिभ्यः प्रत्येक
दशाहुतीस्तत्तन्मंत्रैर्हुत्वातेनैवद्रव्येणयस्तसमभ्यव्याहृतिभिरयुतलक्षकाद्यन्यतरमसंख्यया जुहुया १९
दितिहेमाद्रिमदनो॥ तानिचद्रव्याणिदेवीपुराणे॥ यवव्रीहिश्चतक्षीरतिलकंगुस्तसासिताः॥ वैकंजो
शिरबिल्वार्कदलाहोमेप्रकीर्तिताः॥ उदुम्बरवाम्राम्बुरवावाकुर्यात्क्रमेणपुरवाः॥ मंत्रवंतश्चकर्त

व्याश्वत्थरवःप्रतिदेवतं॥ हुत्वाश्वत्थाश्वरून्सम्यक्ततोहोमंसमारभेत्॥ चर्वादिकंचघृताद्यक्तंहोतव्यं॥
होतव्यंचघृताद्यक्तंचरुभक्ष्यादिकंपुनरितिमात्स्यात्॥ भक्ष्यं॥ द्राक्षादिचरुनैवेद्यशिष्टागुडौदनादि
भिः॥ तानिद्रव्याणिपुत्काइत्येतानिहवींषिसुः॥ समित्संख्यासमाकृतिरित्याश्वलायनोक्तः॥ अधिदेव
तादिभ्योधिहोमाद्यो॥ वरुणायत्वसमिद्भिश्चसर्पिषावतिलैःक्रमात्॥ तत्तन्मंत्रैश्चहोतव्याः क्रमादन्नाद्य
वताः॥ गृह्यपरिशिष्टे॥ प्रधानदशांशेनपार्श्वदेवयोरिति॥ अधिदेवतादिहोमसंख्यावासिद्धे॥ द्वि
त्राश्चैवाधिदेवताःपंचानांचैवपंचधेति॥ द्वित्राःपंचपंचानांगणेशादीनांपंचधाप्रत्येकमित्यर्थः॥ केचि
त्तुद्वौत्रयोवाद्वित्राः॥ विनायकादीनांपंचधाएकैकमितिकेचित्॥ प्रयोगपारिजाते॥ इंद्रादिलोकपा
लाश्चतत्तन्मंत्रैःप्रपूजयेत्॥ तत्तन्मंत्रैर्जपंकुर्यात्ततोहोमंसमारभेत्॥ नरसिंहपुराणे॥ ततोव्या
हृतिभिःपश्चाज्जुहुयात्तत्तिलादिकं॥ यावत्प्रपूज्यतेसंख्यालक्षंकोटिरेववा॥ वाशब्दादयु
तमपियद्यश्चनानियतकालिनः॥ स्वेच्छायज्ञः समुच्यतइतिविध्यन्तरात्॥ ततोव्याहृ
तिभिःकुर्यात्तिलहोमंप्रयत्नतः॥ प्रथमोयुतहोमस्याल्लक्षहोमोद्वितीयकः॥ तृतीयः
कोटिहोमस्यात्त्रिवेधोग्रहयज्ञतः॥ एकरात्रंत्रिरात्रंवापंचरात्रमथापिवा॥ शिवगाधांवि

ष्णुगायांशांतिब्राह्मणभोजनं॥ समापयेत्प्रतिदिनं एवभक्तिसमन्वितइति॥ वासिष्ठ्येक
रात्रादिग्रहणंनियमादर्थे॥ अत्रसत्राद्विजपोपि॥ लुब्धादानवदितिकेचित्॥ वासिष्ठे॥
अथाभिषेकमंत्रेणवाद्यमंगलगीतकैः॥ पूर्णकुंभेनतेनैवहोमांतेप्रागुदङ्मुखैः॥ अभ्यंगाव
यवैर्ब्रह्मन् हेमसंज्ञामभूषितैः॥ यजमानस्यकर्तव्यंचतुर्भिस्नापनंबुधैः॥ अभिषेकमंत्राः प्र
योगवक्ष्यंते॥ वसिष्ठः॥ स्वस्तिकंकल्पयेत्यश्वाकुंडस्यशानभागतः॥ यजमानाभिषेकार्थं
तत्रभद्रासनंन्यसेत्॥ प्राङ्मुखस्योपविष्टस्ययजमानस्यतत्रच॥ अभिषेकंततःकुर्युःसाचा
र्यःषोडशर्त्विजः॥ विविधैर्मंगलैर्घोषैःसूतमागधजैःसह॥ ततस्तस्याभिषिक्तस्यरक्षार्थं
बलिमुत्क्षिपेत्॥ दिग्विदिक्षुविचित्रान्नादीपैर्नीराजयेत्ततः॥ शुक्लमाल्यांबरधरःशुक्लगं
धानुलेपनः॥ ततोमंडपमागत्यध्यायेदग्निंसुरान्यजेत्॥ प्रत्येकंप्रतिमंत्रेश्चदद्याल्लाजां
लिंततइति॥ वामनः॥ आचार्यप्रभृतिभ्यश्चयथार्हंचनफलंततः॥ समिदाज्यचरूणांचतिलहो
मफलंचयत्॥ ब्रह्मत्वेकुंभपूजायाश्चैनस्यफलंचयत्॥ गणपक्षेत्रयाश्चीशदुर्गादेव्यंगदे
वताः॥ तासांजपफलंसम्यक्कृत्स्नायाजपपूर्वकं॥ एतानिचवाप्रनवचनानिनिर्मलांतिपि
तामहचरणाः॥ वासिष्ठगोभिलवचास्यपिकेचिदाहुः॥ वसिष्ठः॥ ततोजयादीन्जुहुयात्॥

२०

पूर्णाहुतिंयथाचरेत्॥ तत्रैव॥ मंत्रेणसप्ततेअग्नइतिपूर्णाहुतिंचरेत्॥ अग्निपुराणे॥ मूर्धानमंत्रेण
संस्रवणंचधारयादद्यादुत्थायपूर्णांवेनोपविश्यकदाचनेति॥ मात्स्ये॥ पूर्णाहुतिंचमूर्धानंदिवइ
त्यभिपातयेत्॥ अत्रभिन्नशाखागतैकादशकपालभेदेकाम्येदर्शेप्राग्नेक्यवदनेकमंत्रयुक्तायां
अनेकसूक्तयुक्तायामपिपूर्णाहुतेरेकत्वामंत्राणांविकल्पः॥ उपांशुयाजइवशाखाभेदेनभिन्नानांया
ज्यानुवाक्यानांसमुच्चयेननुपठंतिवसोर्धारात्वायुक्तहोमेनास्ति॥ प्रमाणाभावात्॥ ततःशुक्लांबरस्य
रक्तशुक्लगंधानुलेपनः॥ सर्वौषध्यैःसर्वगंधैस्नापितोवेदपुंगवैः॥ यजमानःसपत्नीकऋत्विजस्तान्
समाहितः॥ दक्षिणाभिःप्रयत्नेनपूजयेदनविस्मयः॥ सूर्यायकपिलांधेनुंदद्याच्छंखेततथंदवे॥ व
त्सांधुरंधरंदद्याद्भैरवायककुथादिकं॥ बुधायजातरूपंचगुरवेपीतवाससी॥ श्वेताश्वंदेवगुरवे
वृत्सांगामर्कसूनवे॥ आयस्मैवेदद्याकेतवेभागमुत्तमं॥ सुवर्णेनसमाःकार्यायजमानेनदक्षि
णाः॥ बुधप्रीत्यर्थदेयहेमासहस्रार्धंमूल्यतःसमाइतिकेचित्॥ अस्मिन्पक्षेषोडशमाषवि
शिष्टहेमवाचिसुवर्णयदासामजस्यापतेस्तादृशसुवर्णमूल्यंप्रत्येकमितिपरे॥ वस्तुमूल्यमूढे
वृतथाहेमादिदेयं॥ यथासर्वाःप्रत्येकंदशमाषसुवर्णेनसमाभवंतीतिसम्यक्॥ सर्वेषामथवा
गवीशुरवीयेनपुष्यति॥ स्वमंत्रेणप्रदातव्याःसर्वाःसर्वत्रदक्षिणाःस्कांदे॥ केतवेभागमांसा

निसर्वेषामेवकांचनमिति।।तत्रैव।।यत्कृपीडाकरोनित्यंस्वल्पेविघ्नस्यवाग्रहः।।तमेवपूजयेद्भक्त्यादक्षिणाभिःस्वशक्तितः।।दानद्योतेआश्वलायनः।।यथाशक्तितोविप्रान्सत्विजःश्वेतरानपि।।एकमेकाहुतौवाविघ्नहोमेचनेनभोजयेत्।। अत्यर्थंमध्यमश्चापिविघ्नमेकंशताहुतौ।।सहस्रस्याहुतेर्वेकजघन्योपिप्रयोजयेत्।।तत्रैव।।तस्माद्दक्षिणुमशक्तोपिदक्षिणांवात्रमेववा।।जपेःप्रणामेस्तोत्रैश्चतोषयेत्तर्पयेत्ततः।।स्कांदे।।यथाग्रहोद्विजस्तद्वद्बुधिस्तोवेदपारगः।।तोषयेन्मंडुवस्थांश्चेतुष्टमेनंविसर्जयेत्।।अंगहीनोदहेद्राष्ट्रंमंत्रहीनश्चऋत्विजः।।यजमानमदक्षिण्यानास्तियज्ञसमोरिपुः।।तत्रैव।।यथासमन्वितंयंत्रंयंत्रेयाप्रतिहन्यते।। एवंसमुद्भितंघोरंशीघ्रंशांत्यादिनश्यति।।अहिंसकस्यदांतस्यधर्मार्जितधनस्यच।।नित्यंचनियमस्थस्यदासानुग्रहाग्रहाः।। ग्रहागावोनरेंद्राश्चब्राह्मणाश्चविशेषतः।।पूजिताःपूजयंत्येतेनिर्दहंत्समपानिताः।।ग्रहाणामिदमातिष्यंकुर्यात्संवत्सरादपि।।आरोग्यबलसंपन्नोजीवेच्चशरदांशतं।।मात्स्ये।।एवंसमयान्निघ्नन्सर्वान्देवान्विसर्जयेत्।।तत्रमंत्रः।।यांतुदेवगणाःसर्वेपूजामादायपार्थिवात्।। इष्टकामप्रदानार्थंपुनरागमनायच।।भविष्योत्तरे।।ततःसमाप्तेयज्ञेतुकारयेत्तुमहोत्सवं।।शंखवाद्यनिनादेनब्रह्मघोषवरेणच।।मात्स्ये।।अनेनविधिनायस्तुग्रहपूजांसमारभेत्।।

२१

सर्वान्कामानवाप्नोतिमेधस्वर्गंमहीयते।।सदैवायुतहोमोयंनवग्रहमखःस्मृतः।।विवाहोत्सवयज्ञेषुप्रतिष्ठादिषुकर्मसु।।निर्विघ्नतार्थमुनिश्रेष्ठतोवेगाद्भूतेषुच।।वश्यकर्माभिचारादितथैवोच्चाटनादिके।नवग्रहमखंकृत्वानतःकाम्यंसमारभेत्।अन्यथाफलदंपुंसांनकाम्यंजायतेक्वचित्।।तस्मादयुतहोमस्यविधातंतुसमाचरेत्।विवाहेत्यादिनाविवाहादिषुकाम्येचकर्मस्वंगत्वमुक्तं।अत्रयहस्वरूपवर्णदेशगोत्रास्थिरछानमुखाकारस्थापनहोमंमंत्रवदनधूपनैवद्यसमिद्दक्षिणाधिदेवताप्रत्यधिदेवतोपदेशकवाक्येषुअधिदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालानामनेकस्मृतिपुराणभेदेनभूयोविसंवादिभिरनेकपर्यायशब्दैरुपस्थितेनत्रिकवेधशब्दनियमः।।नापिमंत्रवर्णनिकशब्दोपस्थितिःशब्दविषेदेवताअन्यत्तत्स्मारकतयामंत्रविनियोगेनमंत्राणांदेवताप्रापकत्वायोगात्।।तेषांबहुत्वेनास्पष्टलिंगत्वाच्च।।अतोद्रव्यत्यादिषुस्वरूपादिनिर्दिशकस्मृतिमंत्रवर्णोपस्थितशब्दानामन्यतमेनशब्देनोद्देशोग्रहादिनामितिशिष्टाचारोप्येवं।।अत्रव्याहृतिकरणकेयुतहोमेअग्निवायुसूर्यप्रजापतयएवदेवताःनग्रहाःऐंद्यादिवत्तत्प्रकाशकत्वेनविनियोगाभावात्।।अतएवपरिजाते।।ॐभूर्भुवःसुवश्चेतितिस्रोव्याहृतयोजयेत्।। आभिश्चहोमेनग्रहाःदेवताइति।।प्रथा

नेच्छाचग्रहपूजा॥ तद्धोमोयुतहोमश्च॥श्रीकामःशांतिकामोवा ग्रहयज्ञंसमाचरेदित्यादिनातत्पूजा
तद्धोमयोःफलंसंबंधनात्॥ग्रहयज्ञक्रियेप्युक्त्वाप्रधनोयुतहोम इत्यादिनायुतहोम इत्यादिनायुत
लक्षकोटिहोमानांग्रहयज्ञविशेषत्वेनोपक्रमात्॥तस्मादयुतहोमस्यविधानंचसमाचरेदिलुप्तसंज्ञा
रात्र॥यहायहदेवत्यकर्मसमूहःप्राणभृतउपदधातीतिवद्धिंगसमवायेनग्रहयज्ञशब्दः॥तानंच
रणाख्ययुतहोमादीनामेवप्रधान्यंग्रहहोमस्तुंगइत्याकुस्तदाश्रयेनजाने॥योहिकामशब्दे
नफलंसंबंधःश्रीकामःशांतिकामोवाग्रहयज्ञंसमाचरेदित्यादिसत्तायद्ग्रहपूजाहो
मयोरेवोचितग्रहसंबंधंप्राप्तः॥॥ग्रहयज्ञस्यशब्देस्यतन्नामत्वात्॥नचा
युतहोमादीनांफलसंबंधेतत्प्रकरणपाठात्॥ग्रहपूजाहोमहोमयोरंगतेति
वाच्यंवैपरीत्यस्यापिसुकरत्वात्॥अयुतहोमादिशब्दानांग्रहयज्ञसामा २२
नाधिकरण्येनग्रहयज्ञनामत्वंतुलिंगसमवायेननतदंगत्वेनआर्थवा
दिकःफलंसंबंधस्तु॥अनेनविधिनायस्तुग्रहपूजांसमाचरेत्॥सर्वा

कामानवाप्नोतिप्रेत्यस्वर्गंमहीयते॥इत्यत्रपूजासंगतिकरणदानेषुइत्यनुशिष्ट
योःपूजाहोमयोःसदोवायुतहोमोयमित्यायुपक्रम्यनिर्विघ्नार्थंमुनिश्रेष्ठ
इत्यादिनात्वयुतहोमादिनामपिस्मृतिषुतुप्रायजार्थवादिकमेवफलं
अत्रकामशब्दोपनीतेफलेसत्यार्थवादिकंसंबध्यतेनवेतितुविचा
रांतरं॥किंचयाज्ञवल्क्यादिस्मृतिषुनतावद्युतहोमादीनांविधि
धिर्नाप्यनुवादः॥अतोग्रहपूजाहोमयोप्राधान्याभावेतत्रत्येति
कर्त्तव्यतासंबंधोनस्यात्॥अतोग्रहपूजाहोमयोरपिप्राधान्यंभा
ति॥अतएवकचित्केबलग्रहमखेषुतदंगेषुशांतिकादिकर्मस्वेक
स्मृक्तांगप्रधानादरेणस्मृत्यंतरोक्तप्रधानभूतायुतादि

होमंविनापिशारवांतरोक्तग्रहयागाभ्योसंविनेकशारवीयग्रहयागाभ्यास
मात्राणामिवंपूजाग्रहदेवत्यहोमयोरेवानुष्ठानंकथंचित्शिष्टानांसंगच्छंते॥
ग्रहपूजाहोमयोरंगत्वेमत्स्यं त्वंगमात्रानुष्ठानमेवस्यात्॥इत्यूतहोमः॥
अथग्रहादीनांलक्षणानि॥मात्स्ये॥पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः॥सप्ताश्व
रथसंश्रयस्त्रश्चद्विभुजस्यात्सदारविः॥श्वेतःश्वेतांबरधरोदशाश्वःश्वेतभूषणः॥
गदापाणिर्द्विबाहुश्चकर्तव्योवरदःशशी॥रक्तमाल्यांबरधरःशक्तिशूलगदाधरः॥च
तुर्भुजोमेषगमोवरदःस्याद्धरासुतः॥पीतमाल्यांबरधरःकर्णिकारसमद्युतिः॥
खड्गचर्मगदापाणिःसिंहस्थोवरदोबुधः॥देवदैत्यगुरुतद्वत्पीतश्वेतौचतुर्भुजौ२३
दंडिनौवरदौकार्यौसाक्षसूत्रकमंडलू॥इंद्रनीलद्युतिश्शूलीवरदोगृध्रवाहनः॥बाणबाणा
सनधरःकर्तव्योर्कसुतस्सदा॥करालवदनःखड्गचर्मशूलावरप्रदः॥नीलःसिंहासनस्थश्च
राहुरत्रप्रशस्यते॥धूम्रादिबाहवःसर्वेगदिनोविकृताननाः॥गृध्रासनगतानिसंकेतव

स्युर्वरप्रदाः॥सर्वेकिरीटिनःकार्यास्त्रिलोकहितावहाः॥अंगुष्ठनाभ्रिताःसर्वेरातमष्टो
नरंसदति॥ ॥अथाधिदेवताप्रत्याधिदेवतालक्षणानि॥विष्णुर्धर्मोत्तरे॥पंचवक्त्रो
दशभुजःपंचवक्त्रस्त्रिलोचनः॥कपालशूलखड्गांगीचंद्रमौलिःसदाशिवः॥अक्षसूत्र
चक्रमलंदर्पणंचक्रमंडलु॥उमाबिभर्तिहस्तेषुभूजितात्रिदशेरपि॥कुमारःषण्मुखःका
र्यःशिखंडकविभूषणः॥रक्तांबरधरादेवामयूरवरवाहनः॥कुक्कुटश्चतथाघंटातस्य
दक्षिणहस्तयोः॥पताकावजयंतीस्याच्छक्तिःकार्याचमयाः॥विघ्नकोमादकापद्मशं
खचक्रगदाधरः॥प्रदक्षिणदक्षिणाधःकरादारभ्यनित्यशः॥पद्मासनस्थोजटिलोब्रह्मा
कार्यश्चतुर्भुजः॥अक्षमालांस्रुवंविभ्रत्पुस्तकंचकमंडलु॥चतुर्दंतगजारूढोवज्रीकुलिश
हस्तकः॥शचीपतिःप्रकर्तव्यानानाभरणभूषितः॥इंद्रनीलोयमःकार्यदंडहस्तोविजा
नता॥रक्तदृक्पाशहस्तश्चमहामहिषवाहनः॥कालःकरा----लाग्श्चबिभीषणः
॥पाशहस्तोदंडहस्तःकार्यश्चित्रकरोमवान्॥अपीच्यवेषस्त्वाकारंद्विभुजंसाम्यदर्शनं॥

दक्षिणेलेखनीचित्रंयुतंवामेतुपात्रकं॥पिंगलश्मश्रुकेशाक्षःपीनांगजठरोरुणः॥छाग
स्थःसाक्षसूत्राग्निःसप्तार्चिःशक्तिधारकः॥चिह्नितंचमरणास्यकरमन्यंप्रकल्पयेत्॥आ
पस्त्रीरूपधारिण्यःश्वेताम्बरवरानना॥दधानाःपाशकलशामुक्तासरणसंस्थिताः॥शु
क्लवर्णामरीकार्यादिव्यास्त्रणसंस्थिता॥चतुर्भुजासोम्यवपुःश्वेतांशुसदृशांबरा॥रत्न
पात्रंसस्यपात्रंपात्रमोषधिसंयुतं॥पद्मंकरेचकर्तव्यंभु यादवनंदन॥दिङ्नागानांचतु
र्णांसाक्षयापृष्ठगतातथा॥विघ्नाधिपस्यचोक्तं॥वामबाह्याःकरेकार्यासोम्यासतान
मंजरी॥वरदामंडिताकार्याद्विभुजाचतथाशशी॥यज्ञोपवीतीहंसस्थःएकवक्त्रश्चतुर्भु
जः॥अक्षसूत्रंस्रुवंस्रुचंबिभ्रत्कुंडिकाप्रजापतिः॥अक्षंअक्षमालांकुंडिकांकमंडलुं॥
अक्षसूत्रधराःसर्पाःकुंडिकापुच्छसंस्थिताः॥एकसागास्तिसागावासर्वेकार्याश्च
क्षीषणाः॥ब्रह्मलक्षणमुक्तं॥यक्षाणांदक्षिणपार्श्वेस्थापयेदधिदेवताः॥अथविना २५
यकादिलक्षणानि॥चतुर्भुजास्त्रिनेत्राश्चकर्तव्योत्रगजाननः॥नागयज्ञोपवीतश्चरा

शांककृतशेखरः॥दक्षेदंतकरेदद्याद्वितीयेचाक्षसूत्रकं॥तृतीयेपरशुंद
द्याच्चतुर्थेमोदकंतथा॥शक्तिंबाणंतथाशूलंखड्गंचकंचदक्षिणे॥चंद्रबिंबंधोवामेखे
टमूर्ध्वकपालकं॥खट्वांगंचविभ्राणासिद्धिरूढातुदिग्भुजा॥एषादेवीसमुद्दिष्टा
गणेशगतिहारिणी॥धावद्धरिणएवस्याद्ध्वजेधारीसमीरणः॥वरदाक्षयुक्तोधूम्र
वर्णःकार्योविजानता॥नीलोत्पलाक्षंगगनंतद्वर्णाविरधारिच॥चंद्रार्कहस्तंकर्तव्यं
द्विभुजंसोम्यरूपवत्॥द्विभुजोदेवभिषजोकर्तव्यारूपसंस्थितौ॥तयोरोषधयः
कार्यादिव्यादक्षिणहस्तयोः॥वामयोःपुस्तकोकार्यश्रीनीयोतथाद्विजाः॥एक
स्यदक्षिणपार्श्वेवामेचान्यस्ययादव॥नारीयुग्मंप्रकर्तव्यंसुरूपंवासुदर्शनं॥रत्न
भांडकरंकार्यंचंद्रशुक्लांबरंतथा॥अथलोकपालरूपाणि॥तत्रेंद्रश्चियमरूपाणिअ
धिपत्यधिदेवताक्तयोक्तानि॥खड्गचर्मधरोबालोनिर्ऋतिर्नरवाहनः॥ऊर्ध्वकेशोवि
रूपाक्षःकरालःकालिकाप्रियः॥नागपाशधरोरक्तक्षणःपद्मिनीप्रियः॥वरुणो

बुपतिः स्वर्णस्वर्णोमिकरवाहनः॥ वायुर्विनायकादिपंचकउक्तः सोमो ग्रहेषुअनंतः प्रत्यधिदेवतासु॥ ॥अथ लक्षहोमः॥ तत्रग्रहपीठादिनि निमित्तान्युक्तानि अयुतहोमारंभे॥ देवीपुराणे॥ लक्षहोमंप्रवक्ष्यामियथा प्रोक्तंतुशंभुना॥ भूमिकंपेदिशांदाहेग्रहयुद्धउपस्थिते॥ केतुसंदर्शनेचैव आदित्यस्यचकंपने॥ कृष्णवर्णेथवारक्तेतथाछिद्रसमन्विते॥ रक्तवृष्टि स्तथानद्योविपरीतवहंतिच॥ निर्गतंगगनाद्भूमंवारिमध्येचयत्स्थितं॥ उप सर्गास्तथालोके लक्षंतुक्षयकारकाः॥ परस्परंशोग्रहाः पंचअथसप्तसु राधिप॥ ग्रहणंचंद्रसूर्यस्यग्रहेवाष्टमसंस्थिते॥ इत्यादि॥ तथा॥ कंपनंस्व दनंगात्रेअंबुपानाथेजल्पनं॥ देवतानांसुराध्यक्षउक्ताताःक्षयकारकाः॥ लक्षहोमंचकुर्वीतकोटिहोममथापिवेति॥ मात्स्ये॥ अस्माद्दशगुणःप्रोक्तो लक्षहोमःस्वयंभुवा॥ आहुतीभिःप्रयत्नेनदक्षिणाभिस्तथैवच॥ द्विरुक्त २५

विस्तृतंतद्दचतुर्हस्तायतंपुनः॥ लक्षहोमेभवेत्कुंडंयोनिवत्रंत्रिमेखलं॥ आसतोद्विहस्तविस्तृतंफ लतश्चतुर्हस्तायतंभवतीत्यर्थः॥ तथा॥ तस्यचोत्तरपूर्वेणवितस्तित्रयसंमितं॥ प्रागुदक्प्रवणं तद्वत्तुरस्रंसमंततः॥ विष्कंभार्थोच्छ्रितंप्रोक्तंस्रुवंछिन्नंविश्वकर्मणा॥ संस्थापनायदेवानांवप्रत्रय समावृतं॥ तस्मिन्नावाहयेद्देवा पूर्ववत्सुप्यतंडुलैः॥ गरुत्मानधिकस्तत्रसंपूज्यश्रियामि च्छता॥ सामध्यानिशरीरस्त्वंवाहनंपरमेष्ठिनः॥ विषपापहरोनित्यमतः शांतिंप्र यच्छमे॥ अयंगरुडावाहनमंत्रः॥ पूर्ववल्लक्षमामंत्र्यतद्धोमंसमाचरेत्॥ सस्त्री णांशतंहुत्वासमित्संख्यादिकंपुनः॥ पूर्ववत्सुसमिद्धाज्यचरुहोमंप्रकल्पयेत्॥ एवंमंत्रैः कुर्यात्॥ गरुत्मतस्तुसुपर्णेगरुत्मानितिद्वंद्वंमित्रमितिवामंत्रः॥ घृतकुंभवसो र्धारांपातयेदनलोपरि॥ उदुंबरीमथाद्रींचक्रुंचीकोडरवर्जितां॥ बाहुमात्रीं स्रुवंकृत्वाततस्तंहव्योपरि॥ घृतधारांतथासम्यगग्नेरुपरिपातयेत्॥ श्रा वयसूक्तमाग्नेयंवैष्णवंरुद्रमेवच॥ महावैश्वानरंसम्यक्ज्येष्ठसामचपाठ येत्॥ स्नानंचयजमानस्यपूर्ववत्स्वस्तिवाचनं॥ दातव्यामजमानेनपूर्व

वद्दक्षिणापथक्॥ कामक्रोधविहीनेनऋत्विग्भ्यःशांतचेतसा॥ तद्दद्यादथचा
ष्टोवालक्षहोमेपिऋत्विजः॥ कर्तव्याःशक्तितस्तद्वच्चतुरोवाविमत्सराः॥ ब्रह्मचा
र्यसहितानामेवेयंसंख्येतिकेचित्॥ नवग्रहमखासंवैलक्षहोमेदशोत्तरं॥
दद्याच्चमुनिशार्दूलभूषणान्यपिशक्तितः॥ शयनानिस्ववस्त्राणिहेमानि
कटकानिच॥ कर्णांगुलीयचित्राणिकंठसूत्राणिशक्तितः॥ नकुर्याद्दक्षिणा
हीनंवित्तशाठ्येनमानवः॥ अदत्वामोहलोभाद्वाकुलक्षयमवाप्नुयात्॥ अंन
दानंयथाशक्त्यादातव्यंसंमतिमिछता॥ मंत्रहीनंक्रतोर्यस्माद्भवेदक्षफलोनवे
त्॥ तथा॥ तस्मात्सीडाकरोतीवयएवंभवतिग्रहः॥ तमेवपूजयेत्कृत्वाद्वो
त्रीन्वायथाविधि॥ तथा॥ पूज्यतेशिवलोकेचवस्यादित्यमरुद्गणैः॥ यावत्कल्प
शतान्यष्टौअथमोक्षमवाप्नुयात्॥ तथा॥ पुत्रार्थीलभतेपुत्रंधनार्थीलभतेध
नं॥ भार्यार्थीलभतेभार्यांकुमारीचशुभंपतिं॥ भ्रष्टराज्यस्तथाराज्यंश्रीकामः

डाक्टर भाऊदाजी लहान्या संस्कृत मराठी संग्रहालय MEMORIAL

श्रियमाप्नुयात्॥ यंयंप्रार्थयतेकामंतंतंप्राप्नोतिपुष्कलं॥ निष्कामःकुरुतेय
स्तुपरंब्रह्मसगछति॥ ॥इतिलक्षहोमः॥ ॥कोटिहोमः॥ तत्राप्ययुतंलक्षंहोमप्र
करणएवनिमित्तान्युक्तानि॥ भविष्योत्तरेपि॥ संवरणउवाच॥ भगवन्महऽत्पातसंभ
वेक्षुद्भयकंपने॥ निर्घातेमांसुवर्षेचग्रहसंगेतथैवच॥ जन्मनक्षत्रपीडासुअनाद्यष्टिभ
येषुच॥ क्रूरासुग्रहपीडासुदुर्भिक्षेराष्ट्रविद्रवे॥ व्याधीनांसंभवेजातेशरीरेचातिपी
डिते॥ क्लेशेबहुनिचोत्पन्नेकिंकर्तव्यंतरेततः॥ स्वर्गस्यसाधनंयत्तत्कीर्तिदंधनदंत
था॥ ब्रूहित्वंहितश्रेष्ठतथारोग्यप्रदंनृणां॥ सनत्कुमारउवाच॥ शृणुराजन्प्रवक्ष्या
मिशांतिकर्मण्यनुत्तमं॥ कोटिहोमाख्यमतुलंसर्वकामफलप्रदं॥ ब्रह्महत्यादिपा
पानियेननश्यतितत्क्षणात्॥ उत्पाताःप्रशमंयांतिमहत्संपद्यतेसुखं॥ विधानंतस्य
वक्ष्यामिशृण्वेकमनाभव॥ देवागारेशिवेतीर्थेवाशिवसंनिधौ॥ पर्वतेचाथकूप
तयइछेत्क्षेममात्मनः॥ शुभनक्षत्रयोगेचवारेसर्वगुणान्विते॥ यजमानस्यानुकूले
कोटिहोमंसमाचरेत्॥ पूजयित्वाप्रयत्नेनब्राह्मणंवेदपारगं॥ वस्त्रैर्विभूषणैश्चैव

गंधमाल्यानुलेपनैः॥ प्रणम्य विधिवत्तस्मै चात्मानं विनिवेदयेत्॥ त्वमेव ततः पिता माता
त्वं गतिस्त्वं परायणं॥ त्वत्प्रसादेन विप्रर्षे सर्वमस्यात्मनागतं॥ आपदामोक्षाय च मकु
रुष्व मन्नुत्तमं॥ कोटिहोमाख्यमतुलं शांतिकं सार्वकामिकं॥ पुरोहितस्ततः प्राज्ञः शुक्लां
बरधरः शुचिः॥ ब्राह्मणैः सहितः पुण्यैः संयतः सुसमाहितः॥ तस्मिन्नागे समेशुभ्रायु
क्तस्रुवधृतथा॥ पुण्याहवाचयेत्सर्वं कृत्वा विघ्नास्तरज्जयेत्॥ ततः समाहिता विप्रैः सह
त्रयेन्मंडपशुभे॥ उत्तमश्चतुरस्रस्तु तद्धेनुर्मध्यमे॥ अधमे तु तदर्धेन राकाकालात्प
क्षया॥ मध्ये तु मंडपस्यापि कुंडं कुर्याद्विचक्षणः॥ अष्टहस्तप्रमाणेन आयामेन तथैव च
॥ मेखलात्रितयं तस्याद्दशांगुलविस्तृतं॥ तत्प्रमाणं तथा योनिं कृत्वा तत्र समाहितः
॥ कुंडस्यपूर्वभागे तु वेदीं कुर्याद्विचक्षणः॥ चतुर्हस्तासमा चैव हस्तमात्रोच्छ्रिता नृपः
॥ स्थापनं चैव दातानां कुर्याद्यत्नेन बुद्धिमान्॥ उपलिप्यततोस्मिंमंडपस्थं प्रकल्पयेत्
॥ स्थापयेद्दिक्षुसर्वासु तोरणानि चरक्षणः॥ एवंसंस्कृतसंभारः पुरोधाः सुसमाहितः
॥ पुण्याहजपघोषेण होमकर्म समाचरेत्॥ स्थापयित्वा सुरान्वेद्यां वक्ष्यमाणान्नि

दम॥ ब्रह्माणं पूर्वभागे तु मध्ये देवं जनार्दनं॥ पश्चिमे तु तथा रुद्रं वरुणं उत्तरे तथा॥ ईशा
न्यां चयक्षान्सर्वान्नैर्ऋत्यामसुरांस्तथा॥ वायव्यस्थांस्तथैशान्यां लोकपालान्क्रमेण तु॥ ए
वं संस्थाप्य विबुधान्यथास्थानं नृपोत्तम॥ पूजयेद्विधिवद्यत्र गंधमाल्यानुलेपनैः॥ वे
दोक्तमंत्रसंलिंगपुराणोक्तैः पृथक्पृथक्॥ आदित्यावसवोरुद्रा लोकपालास्तथैव च॥ ब्र
ह्माजनार्दनश्चैव शूलपाणिमरुच्चरः॥ अत्रसंनिहिताः सर्वे भवंतु क्रतवे तव॥ पूजा
गृह्णंतु सर्वत्र मयास्तुत्या प्रपादिताः॥ प्रकुर्वंतु शुभं सर्वं यज्ञकर्तुः समाहिताः॥ एवंपूज्य
यित्वा तान्देवान्यत्नेन बुद्धिमान्॥ नैवेद्यैर्विविधैर्भक्ष्यैः फलैश्चैव सुरार्चितैः॥ ततस्तत्र
द्विजैः सर्वैः कुंडस्याविधिपूर्वकं॥ कुर्यात्संस्करणं यथोक्तं वेदवित्तमैः॥ ततः समाह्व
येद्ऋत्विनामाख्यातघृताचितं॥ निजेयोयेद्विजास्तत्रशतसंख्यान्नृपोत्तम॥ अलाभे
चवरूनांचयथालाभंनियोजयेत्॥ विद्यावित्तवयोवृद्धान्गुरुस्थान्संयतेंद्रियान्॥ स्व
कर्मनिरतांश्शुद्धान्ज्ञानशीलान्प्रयत्नतः॥ चिंतयेत्तत्रदेवेंद्रंपावकास्यं नृपपावकं॥ मुखानि

शां.म. २८

तस्य चत्वारि सप्तजिह्वानि पार्थिव॥ एकजिह्वमथैकं तु तत्सर्वं सार्वकामिकं॥ रमायमानेन वथा होतव्यं ललितेन ते॥ ऋग्भिः पूर्वमुखैः कार्यो यजुर्भिश्चोत्तरामुखैः॥ सामभिः पश्चिमे कार्यः पूर्ववद्दक्षिणामुखैः॥ आघारावाज्यभागौ तु पूर्वमुक्तौ विचक्षणैः॥ परितश्च परिस्तीर्णं कल्पितं च तथासनं॥ ब्राह्मणाः पूर्वमेवं तु सर्वं पश्चात्समाचरेत्॥ होमो व्याहृतिभिश्चैव सर्वत्र विधीयते॥ प्रणवादिभिश्च तद्धीमैः स्वाहाकारांतयोजितैः॥ जुहुयात्सर्वदेवानां वेद्यायेचावकल्पिताः॥ एवं प्रकल्पयेद्यज्ञं कोटिहोमाख्यमुत्तमं॥ तिलाः कृष्णाघृताप्यक्ताः किंचिद्धीहिसमन्वितं॥ किंचिद्यवसमायुक्ता इति केचित्प्रचक्षते॥ होतव्याः कोटिहोमे तु समिधः सुपलाशजाः॥ पूर्णपूर्णे सहस्रं तु दद्यात्पूर्णाहुतिं शुभां॥ पंचमे तन्मुखे राजन्सर्वकामार्थसिद्धये॥ पूर्णाहुत्यः समाख्याताः कोटिहोमे नराधिप॥ सहस्राणि नृप २८

श्रेष्ठदशास्त्रविस्तारैः॥ प्रारंभदिनमारभ्य ब्राह्मणैर्ब्रह्मवादिभिः॥ होतव्यं यजमानेन श्वअथवासुपुरोहितैः॥ क्रोधलोभादयोदोषावर्जनीयाः प्रयत्नतः॥ यजमानेनराजेंद्र सर्वकामनसीप्सिता॥ मात्स्ये॥ अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा॥ आहुतिभिः प्रयत्नेनदक्षिणाभिः फलेनच॥ पूर्ववद्ब्रह्मदेवानां आवाहनविसर्जनं॥ होममंत्रास्तएवोक्ताः स्नानदानेतथैवच॥ कुंडमंडपवेदीनां विशेषोयंनिबोधमे॥ कोटिहोमेचतुर्हस्तं चतुरस्रं चसर्वशः॥ योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलं॥ सर्वतश्चतुर्हस्तमितिविस्तारायामखातेष्वित्यर्थः॥ योनिवक्त्रद्वयोपेतमित्येकायोनिः पश्चिमतोन्यादक्षिणतइतिहेमाद्रिः॥ वक्त्रंकंठः॥ योनिकंठयुतामितिपितामहचरणाः॥ वेदिश्चकोटिहोमेस्याद्ऋत्विजांचतुष्टयं॥ चतुरस्त्रासमातद्वन्निभिर्वप्रैः समावृता॥ वक्त्रप्रमाणंप्रोक्तंवेदिकायातथोच्छ्रयः॥ उक्तमयुतहोमे॥ तथाषोडशहस्तस्यामंडपस्याश्चतुर्मुखः॥ पूर्वद्वारेचसंरुध्याद्व

ऋचंवेदपारगं॥यजुर्वेदंतथायाम्येपश्चिमेसामवेदिनं॥अथर्ववेदिनंतद्वदुत्तरेस्थापयेद्बुधः॥अष्टौतुहोमकाःकार्यावेदवेदांगवेदिनः॥एवंद्वादशताविप्रान्वस्त्रमाल्यानुलेपनैः॥एवंविसृजयेद्भक्त्यासर्वाभरणभूषितैः॥रात्रिसूक्तंचरौद्रंचपावमानंसुमंगलं॥एवंतावद्भवेच्छांतिपठनात्तूदकुंभवः॥शाकंरुद्रंचसौम्यंचकोशमांडंशांतिमेवच॥पठेद्दक्षिणद्वारियाजुर्वेदिकसुत्तमं॥सौपर्णमथवैराजमाग्नेयंरौद्रसंहिता॥ज्येष्ठसामतथाशांतिंछंदोगःपश्चिमपठेत्॥शांतिसूक्तंचतथा तथाशाकुनंकुशं॥पौष्टिकंचमहाराजंनुत्तरेणाप्यथर्ववित्॥पंचभिःसप्तभिर्वाथहोमःकार्यस्त्रिरेववै॥स्नानदानेचमंत्राःस्युस्तएवमुनिसत्तम॥वसोर्धारांविधानंतुलक्षहोमंवदिष्यते॥अनेनविधिनायस्तुकोटिहोमंसमाचरेत्॥सर्वान्कामान्वाप्नोतिततोविष्णुपरंव्रजेत्॥यःपठेच्छृणुयाद्वापियरुशांतिंचयंनरः॥सर्वपापविशुद्धात्मापदमिंद्रस्यगच्छति॥अश्वमेधसहस्राणिदशवाष्टौचधर्मवित्॥हत्वायत्फलमाप्नोतिकोटिहोमात्तदश्नुते॥ब्रह्महत्यासहस्राणिश्च २९

णहत्यौर्बुदानिच॥नश्यंतिकोटिहोमेनयथावच्छिवभाषितं॥इतिकोटिहोमः॥अथशतमुखकोटिहोमः॥संवरणउवाच॥बहुलाकर्मणिब्रह्मन्कोटिहोमःसदुष्करः॥
---कथंचन॥नियमाब्रह्मचर्याद्याःदुष्कराइतिमेमति॥निरोधोब्राह्मणानांचभूशय्यादिःसुदुष्करः॥कार्याणामलघीयस्त्वात्सर्वकालाद्यपक्षया॥एतद्विज्ञायतंब्रह्मन्सर्वशास्त्रेषुपठ्यते॥कोटिहोमस्यसंक्षेपंवदमेब्रह्मसंभवः॥सनत्कुमारउवाच॥शतानांनोदशमुखोद्विमुखैकमुखस्तथा॥चतुर्विधोमहाराजकोटिहोमोविधीयते॥कार्यस्यकुरुतांज्ञात्वानेकयज्ञमथपर्वणः॥यथासंक्षेपतःकार्यःकोटिहोमस्तथाशृणु॥कृत्वाकुंडशतं यथोक्तंमानसंमितं॥एकैकस्मिन्स्थाकुंडेदशविप्रान्नियोजयेत्॥सघःपक्षेतुविप्राणांसहसंपरिकीर्तितं॥एकस्थानप्रणीतेग्नौसर्वतःपरिभाविते॥एकस्थानात्सर्वतःसर्वस्मिंकुंडेपरिभावितेसंस्कृतेग्नौप्रणीतइत्यर्थः॥होमंकुर्युर्द्विजाःसर्वेकुंडेकुंडेयथोदितं॥यथाकुंडबहुत्वेपिराजसूयेमहाक्रतौ॥तत्राग्निबहुत्वंतस्यानचयोविधिष्यते॥तथाकुंडशतेप्यत्रऋत्विग्भिर्नियो

जिते॥ एकएवक्षवेद्यसः कोटिहोमोनसंशयः॥ एवंयःक्रियतेक्षिप्रंव्याकुलेःकार्यगोरवात्॥ शतानना
सविज्ञेयःकोटिहोमोनसंशयः॥ स्वल्पेरहोभिःकार्यस्याद्दीर्घकालादिकेपिवा॥ दशमुखस्तद्दाकार्यःकोटि
होमःशुभेमते॥ विप्राणांद्विशतेतत्रप्रविभज्यनियोजयेत्॥ तेपिविज्ञानशीलास्युर्व्रतवंतोजितेंद्रियाः॥
यत्रकुंडद्वयंकृत्वाविभज्यचविभावसुं॥ होमंकुर्युर्द्विजाभूयःसंस्कृत्यविधिपूर्वकं॥ शतंतत्रनि
योज्यंचविप्राणांचविभज्यवै॥ मासेथवार्धमासेवाकार्यकालेद्युपस्थिते॥ तथापिद्विमुखःका
र्यःकोटिहोमोविचक्षणैः॥ तथातुस्वेच्छयायज्ञंयजमानःसमापयेत्॥ कालेनबहुनाराज
न्तथावैकमुखोभवेत्॥ एककुंडस्थितोवह्निरेकचित्तैःसमाहितैः॥ यथालाभस्थितोवि
प्रैर्ज्ञानशीलैर्विचक्षणैः॥ नसंख्यानियमश्चात्रब्राह्मणानांनरोत्तम॥ नकालनियमश्चै
वस्वेच्छायज्ञःसउच्यते॥ आवश्यककर्तुकामायचातुर्मास्यादिकर्मवत्॥ तदाप्रसक्तःक
र्तव्योयसोयंसर्वकामिकः॥ अयमेकमुखोराजन्कालेनबहुनाभवेत्॥ बहुविप्रश्चब
कालोवैतस्मात्संक्षेपमाचरेत्॥ यतोवैवित्तमायुश्चवित्तंचैवास्थिरंसदा॥ अतःसंक्षे
पतःकार्यधर्मकार्यंप्रशस्यते॥ ततःसमाप्तेयज्ञेतुकारयेत्तुमहोत्सवं॥ शंखतूर्यनिना. ३०
देनब्राह्मणेषवरेणच॥ ततस्तुदक्षयेविप्रान्द्विजःश्रद्धयान्वितः॥ एकैकंकनकेश्वेवकु

उलैर्विविधैरपि॥ गोशतंचैवदातव्यंअश्वानांचशतंतथा॥ सहस्रंतुस्वर्णस्यसर्वेषामपि
दापयेत्॥ ग्रामैर्गजैरथैरश्वैःपूजयेच्चपुरोहितं॥ दीनांधकृपणान्सर्वान्वस्त्रान्नेश्चापिपूजये
त्॥ ततश्चावभृथेस्नायात्तैर्घटैःपूर्वकल्पितैः॥ लक्षहोमोक्तमंत्रेणसदाविजयकारिणा॥
एवंसमापयेद्यस्तुकोटिहोममरंभुसं॥ तस्यारोग्यंप्रियाःपुत्राआयुर्वृद्धिस्तथैवच॥ सर्व
पापक्षयश्चैवजायतेनृपसत्तम॥ अनावृष्टिभयंचैवउत्पातभयमेवच॥ दुर्भिक्षयरूपीडाश्च
प्रशमंयांतिभूतले॥ एतत्पुण्यंपापहरंसर्वकामफलप्रदं॥ सनत्कुमारमुनिनापार्थिवायानि
वेदितं॥ सर्वोपसर्गशमनंसर्वनाशनंवायेकारयंतिमनुजान्प्रकोटिहोमं॥ सोगानवाप्यम
नसोभिमतान्प्रकामंनेयांतिसदनंसुविशुद्धसत्वाः॥ अत्रयथेतसाहस्राःसाद्यस्काद्येकसंज्ञ
योपक्रांतेषुक्रमात्रातेषुचनिकायिसंज्ञकेषुत्रयमस्यान्नातधर्मकस्यधर्मोत्तरथनाम्नात
धर्मकेषुनिकायित्वावातरसामान्यात्साहस्रसाद्यस्काद्येकनामकत्वाच्चत्रवर्ततइत्यष्टमनिका
यिनांतुपूर्वस्योत्तरेषुप्रवृत्तिस्यादित्यत्रनिरणायि॥ तथैहचतुर्विधोमहाराजकोटिहोमइतिच
तुर्णांकोटिहोमत्वान्नांतरसामान्येनसधर्मकस्यैकमुखस्यधर्मअनाम्नातधर्मकेषुद्विमुखादि

षुप्रवर्तेतेनतेषांविकृतित्वं।।तत्रद्विमुखंतावत्कुंडद्वयंप्रकृतिप्राप्तेषुशतपंचाशत्पंचविंशति
रुत्तमंडपेषुमध्यनवमांशेकार्यं।।तस्यैवमध्यमनवमांशेतुकुंडंकुर्याद्विचक्षणइतिप्रकृतौव
चनेनात्रापितथाप्राप्तेः।।तच्चकुंडद्वयंषट्रुत्तंदशलक्षमितेहोमेषट्करसंप्रचक्षतइतिप्रवि
ष्यपुराणात्।।पंचरुत्तवा।।कुंडंपंचकरंप्रोक्तंदशलक्षऊतोकमात्।।इतितंत्रांतराच्च।।
दशलक्षोत्तरमेकोनकोटिपर्यंतंपंचषट्करइत्यर्थः।।अयुतहोमतःप्राप्तंएकरुत्तत्वंप्राक्त
संपरिणं।।लक्षार्थत्वात्तस्याप्राक्तनकार्यत्वाद्बाध्यते।।अर्थात्षरिमाणमितिकात्यायनोक्तेश्च।।
तत्रपंचविंशतिहस्तेमंडपेमध्यनवांशेदक्षिणोत्तरयोःकुंडद्वयंनिवेशेतेकथंचित्स
प्तितोद्वादशांगुलमेखलाप्राप्तेः।।इतरयोस्तुमंडपयोस्तत्सूत्रगएवनिवेशः।।
एवंदशसुखेषिप्राकृतेकहस्तत्वबाध्येयंपंचकराणिषट्कराणिवादशकुंडानि।।
तेषुप्रकृत्यैकंदशलक्षाऽऽहुतयः।।तत्रयंचविंशतिहस्तेमंडपेमध्यमांशेपूर्वा
दिषुचतुर्षुदिग्मध्येसंलग्नानिचत्वारिकुंडानि।।प्राक्तनमध्यमांशाधि
करणत्वस्यायत्नसंभवमनुग्रहस्यान्याय्यत्वात्स्वाचिनवमांशेतुप्राकृतीवतु

करावदी।।स्वस्वशेषुषट्कुंडानियःकश्चिदेकोंचरुत्तरिक्तएव।।पंचाशद्धस्तेयज्ञ
पिसंभवतिकुंडद्वयंमध्यमांशेअष्टस्वंशेष्वष्टाकपिकेचित्।।शतमुखेपिपंच
विंशतिरुत्तेतावन्मंडपेशतकुंड्यानिवेशोबाधितएव।।पंचाशद्धस्तेयद्यपि
संभवतितथापिसरुत्रिंशाणांमुखेनिवेशोबाधितः।।अतःशतरुत्तएव
निवेशउच्यते।।तत्रमध्यमांशेत्राग्भावउत्कृष्टसंख्यापंचनामेकापंक्तिः।।ते
षांचकुंडानांप्रत्येकंअंतरंसार्धसप्तरुत्ताःसप्तांगुलानिच।।ततःप्रतीच्यांमेता
दृशमेवान्यपंक्तित्रयंकार्यं।।पंक्तीनामंतरंचाष्टौरुत्ताःपंचांगुलानिच।।एवंविंश
तिकुंडानिमध्यमांशेअन्येषट्सूत्रांशेषुमध्येद्वेअष्टसुदिक्षुअष्टावितिं।।
प्रत्येकंदशदशेति।।नतुशतकुंडेषुप्रत्येकंलक्षाऽऽहुतिप्राप्तिश्चेत्तत्रघःकोटि
मपक्षेसंभवति।।एवंकुंडशतंदृश्यंयथोक्तंरुत्तसंमितमितिशतमुख
प्रकरणेकुंडानांरुत्तपरिमाणोक्तेरितिचकेचिद्रुत्तसमित्यत्ररुत्ताक्षां

शांम हस्तेवा संमिति विय हेण द्वित्रिचतुर्हस्ता पियुज्यते द्विहस्तेपि तु लक्षमाऊ
तयः समांस्येव ॥ अतएव हेमाद्रौ ॥ असुतेत्वथ होतव्ये कुंडस्याऽरत्नमात्रकं द्वि
३२ गुणं लक्षहोमंतु कोटिहोमे चतुर्गुणं ॥ यद्यप्यौत्सर्गिकएकवचनांतेन विग्रहस्त
थाप्यनुपपद्याद्विबहुवचनांतेनापिक्रियते ॥ यथासप्तदशप्राजापत्यान्यूनेलक्ष
ते इत्यत्र चोदकप्राप्तेकपशुतिष्यत्रहृदयाद्येकादशावदानगुणानुरोधेनप्राजा
पतिदेवतायस्यासौ प्राजापत्यः प्राजापत्यश्च प्राजापत्याइतिकृतद्धितांतनामेकए
वयोगोनतुअयंचायंचैकइत्येकरीषोत्तरतद्धिताचोदकबाधापत्तेरितिउक्तं ॥
एवंचद्विचतुर्हस्तकुंडसंपत्यायुज्यंतएकैकस्मिन्कुंडेलक्षणमाऊतयइत्याऊः ॥
तात्चरणास्तुव्यासतुल्यखादेनषड्पंचचतुस्त्रिद्व्यंगुलानांपंचमेखलानां
विंशत्यंगुलोच्छ्रितयाचमध्यावकाशंविदध्याएकैकहस्तेष्वपिशक्त्याएवलक्ष ३२
माऊतयः कर्तव्याअनारभ्यास्तातपंचमेखलापक्षेणप्राकृतमेखलात्रयबाध
स्तुउपदिष्टैकहस्तत्वानुरोधेनेतियुक्तमाऊः ॥ अत्रैकस्मिन्कुंडेआज्यभा
गांतंकृत्वान्यकुंडेष्वग्निप्रणयनमितिकेचित् ॥ तत्र ॥ वारुणप्राघासिकदक्षि
णोत्तरवेधारनधीयमाणायांमारुत्यामाग्नेयाद्यैरुविष्णुचाघाराज्यभागप्रया
जाद्यंगानांपृथगनुष्ठानवदिहापितिस्रआहुतीर्जुहोतीतिवत्संख्ययाग्निनेष्ठ
कोटिसंख्याकेषुहोमेषुलक्षणःशतकुंडेष्वनुधीयमाणेष्वाज्यभागांतस्विष्ट
कृताद्यंगानुष्ठानमेदस्यैवन्याय्यत्वात् ॥ किंचअप्रमादार्थंदीक्षाकालीनजा
गरेणदीक्षोपयुक्तसंभारसंरक्षणेपिप्रायणीयाद्यर्थंसंभारसंरक्षणार्थमिति
देशिकजागरणंवत्तिवदिहापिअग्निसमिंधनार्थंधमाधानवत्तिःकथम
प्यवार्यैव ॥ नह्याचार्यकुंडस्थेनाग्नौसमिधेकुंडांतरस्थानांसमिंधनंभवति ॥
अतएवायुतहोमेपूर्वलिखितंतंऽहाकारनवकुंडीपक्षेप्रधानायतनाद
ग्निंविभज्यकुंडेष्वप्रणीयानवाचार्यआज्यभागांतंकृत्वाइत्यादिनाहोमशे
षंसमाप्यपूर्णाहुतीर्हुत्वेयंतेनाज्यभागांतानांस्विष्टकृदादीनांचांगानां
मावत्तिर्लिखनंप्रयोगपारिजातीयंसंगच्छते ॥ तदेवचकोटिहोमेचोदका

स्नानं ॥ प्राङ्नाष्टसंख्याबाधेननवनवतिसंख्यामात्रं विधीयते ॥ यद्यपिप्रणयनांतरंय
थापिनद्वमेकमेव ॥ सर्वथागानामाहुतिरेवैतावान्पुरं विशेषः ॥ शतसंख्ययाकुंडे
षुनवसंख्यायहव्याकारस्थलविशाश्चनिवर्तते ॥ अतोनिस्थापनोत्तरमेवप्रणयनं ॥
यत्तुपारिजोतमध्यकुंडात्प्रणयनमुक्तं ॥ तत्र ॥ प्राग्दपवर्गचारबाधात् ॥ तेनस्तरस्त
णार्थंनेऋसकुंडादेवप्रणयनंकार्यं ॥ अस्तुवाकथाचिद्युतरोमेमध्यकुंडसंज्ञावात्तस्य
प्रधानश्रुतस्तर्यदेवत्यताकथंचित्ततः प्रणयनंतातमुख्यतुमध्येकुंडनिवेशात्सावांनृत
तोग्निप्रणयनंमध्यस्थलसमीपवर्तिघनेककुंडेषुतुनिगमनाविरुद्धः ॥ सर्वप्रियको
दिरोमेविचारस्तातचरणैस्तनिर्णयस्तुविहत्तरतिनेहविस्तरः ॥ ॥ अथप्रायामा
स्यानुसारिणीमिष्टकृतापद्धतिमनुस्त्यरुमस्वप्रयोगः ॥ कर्तापारंभदिनात्सर्व
स्मदिनदानमयरवीयास्मदुक्तप्रकारेणाअन्यतमप्रकारेणप्राचीसंसाध्यततवित्त
स्फच्छायंमंडपनिवेशयोग्यंचतुरस्रंचलुरुलाघवक्रिदेशकालौस्मृत्वाअमुककर्म ३३
कर्तुमंडपंकरिष्यइतिसंकल्प्यगणेशंकूर्मशेषंवसुधांश्चसंपूज्यागछसर्वकर्माणिवसु

धेलोकधारिणि ॥ उद्धृतासिवराहेणसशैलवनकानना ॥ मंडपंकारयाम्यद्यत्वद्ध्वंशुभ
लक्षणे ॥ गृहाणार्घ्यमयादत्तंप्रसन्नाभवसुधायाअर्घ्यदत्वास्यानापृथिवी
तिंप्रार्थ्यमंडपंतउदीच्यांमध्यवाकुंडंवेदिंचकुर्यात् ॥ मंडपश्चायुतरोमेद्वहस्तोदशहु
स्तोवा ॥ कुंडंहस्तमितंचतुरंगुलेकमेखलंवेदीमंडपोत्तरक्षागेहस्तविस्तृतावितस्त्युच्छ्रि
तावप्रत्रयवतीकार्या ॥ तत्रप्रथमावप्रस्त्र्यंगुलोच्छ्रायः तदुपरितेनोप्रत्येकंत्र्यंगुलोच्छ्रि
तोविस्तारस्तुसर्वेषामपिप्रत्येकंत्र्यंगुलः ॥ लक्षहोमेतुमंडपोद्वादशचतुर्दशषोडशहस्तो
पिकुंडंक्षेत्रफलतश्चतुःकरंतदेवव्यासतोद्विकरंद्वित्रिचतुरंगुलोर्ध्वमेखलंतत्रापि
रितनीचतुरंगुलविस्तारा ॥ अधोगतेऽपिप्रत्येकंत्र्यंगुलविस्तारे ॥ कुंडदीशान्यांसार्ध
हस्तविस्तृतातदर्धोच्छ्रितेशानप्रवणापूर्ववत्रिवप्रावेदी ॥ कोटिहोमेतुशततदर्धतद
र्धषोडशान्यतमहस्तोमंडपः ॥ कुंडंतुअष्टहस्तंदशहस्तंषोडशहस्तंवाफलतः ॥ त
च्चव्यासंसमस्वातंमंडपमध्येतस्यदक्षिणापश्चिमयोर्योनिंध्यवेदीचप्रा

र्यांद्विरुक्तविस्तृतेतिविशेषः॥द्विमुखदशमुखशतमुखषडुत्तरिणयावत्सरेसंनि
वेशउक्तः॥कर्तासुदिनमासपक्षादिकंसंकीर्त्यश्रीकामादियरुपीडानिवारणका
मावायुतहोमंलक्षहोमंकोटिहोमंवाकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाच
नमातृकापूजावृद्धिश्राद्धाचार्यादिवरणानिकुर्यात्॥तत्रायुतहोमेचत्वारऋत्विजो
द्वौवा॥लक्षहोमेषडादशाष्टौचतारोवा॥कोटिहोमेषोडशार्थेचतारोद्वारजाप
काइतिद्वादश॥अयुतलक्षकोटिहोमेषुत्रिषुपिषोडशवा॥ब्रह्मत्वायावद्व्यतन्मध्य
एवासर्वत्रवरणमंत्रास्तु॥आचार्यस्त्वयथास्वर्गेशक्रादीनांबृहस्पतिः॥तथात्वं
ममयज्ञेस्मिन्नाचार्योभवस्रुव्रत॥यथाचतुर्मुखोब्रह्मास्वर्गलोकेपितामहः॥तू
थास्मिन्ममयज्ञेत्वंब्रह्मासंपद्यजोत्तम॥अस्ययागस्यनिष्पत्तौसर्वतस्यचिंता
मया॥स्रुग्घ्रसंनाःप्रकुर्वंतुशांतिकंविधिपूर्वक॥कोटिहोमंतुगुरुस्त्वार्थना॥त्वंमे ३४
यतःपितामातात्वंगतिस्त्वंपरायणं॥त्वत्प्रसादेनविघ्नंमेस्यान्मनागतं॥आ

षड्भिर्मासैश्चमंडलंकुरुयशस्वंतं॥कोटिहोमाख्यमतुलंशांत्यर्थंसार्वकामिकं॥
ततःसर्वानाचार्यादीन्स्वशाखीयानांविरुशाखीयानांचपदार्थानामनुस
मयेनमधुपर्केणसंपूज्यशुक्लवस्त्रानुलेपनःसपत्नीकस्त्विरुसहितोक्तदक्षिणा
मिरितिवेदघोषणमंडपंप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविशेत्॥तत्राचार्यो
यत्रसंस्थितस्तत्स्थानमाश्रित्यसर्वदा॥स्थानंत्यक्तुंतुसर्वंयत्रस्थंतत्रगच्छतु॥
अपक्रामंतुतेसर्वेपिशाचाःसर्वतोदिशं॥सर्वेषामविरोधेनब्रह्मकर्मसमारभे
इतिसर्षपान्विकीर्यशुचीवाक्व्याहृतिभिरेतांविंद्रमितिचतृचास्यांआपोहिष्ठेया
दिसिश्चसुवंप्रोस्यस्वस्त्ययनंतार्क्ष्यमितिऋक्कूष्मांडयपूर्वत्॥ततोमंडपनिर्क्रतिदिसा
गेस्तंभंवेदिंकृत्वातस्यावस्त्रप्रसायतत्रसुवर्णादिशलाकयारेखाप्राक्पू
श्चिमायतानवचंद्रक्षिणोत्तरायताःकृत्वामध्येकोष्ठचतुष्टयमेकीकृत्यप्रतिको
णंत्रिषुपदेषुसूत्रंदद्यात्॥तथाचतुर्विंशतिरर्धपदानिसंपद्यंते॥मंडलस्याग्ने
यादिषुकोणेषुत्रिकचतुष्टयंविरंतुस्तंठे॥नागालोकपालाश्चसर्वतः॥मंडपे

त्रावतिष्ठंतुआयुर्बलकराःसदेतिमंत्रेणनिक्षाय।अग्निभ्योप्यथसर्पेभ्योयेचान्ये
तान्समाश्रिताः।।तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तमं।।नैऋतानामधिपतिश्चैव
नैऋतायेचराक्षसाः।।बलिंतेभ्यःप्रयच्छामिपुण्यमोदनमुत्तमं।।रुद्रस्यश्चैवसर्पे
भ्योयेचान्येतान्समाश्रिताः।।बलिंतेभ्यःप्रयच्छामिगृह्णंतुसततंतुमे।।इतिमंत्रैः
शंकुपार्श्वेषुयथाक्रममंत्रंप्रतिमाषमात्रंबलिंदत्वा।।शांतिर्यशोवतीकांतिर्विशा
लाप्राणवाहिनी।।सतीचक्षुमतीनंदासुप्रज्ञेतिनवदक्षिणोत्तरायतरेखादेवताःपू
जयित्वा।।हिरण्यास्रक्प्रसालक्ष्मीर्विमलाप्रिया।।जयाकालाविशोकाचेतिनव
दक्षिणोत्तरायतरेखादेवताश्चसंपूज्यमध्येन्यस्तसमस्तव्याहृतिंसर्वास्तत्पुरुष
भावाद्यवास्तोष्पतयेतिसंपूज्यबलिंदत्वापद्मचतुष्टयेवास्तोष्पतेब्रह्माणमा
वाह्यपूजयित्वा।।-ब्रह्मणेनमोबलिंसमर्पयामीतिपायसबलिंदत्वात
तःपूर्वपद्मदक्षिणस्तनेयमेनमःदक्षिणपद्मजठरदक्षिणभागेवि
वस्वतेनमःपश्चिमपद्मजठरवामभागेमित्रायनमःवामस्तनेपृथ्वीधरा ३५

पद्

यनमइतिदक्षपद्मे।आग्नेयेकोणसूत्रद्विधाकृतब्रह्मपदसंलग्नपदोत्तरा
र्धेदक्षिणहस्तेसावित्रायनमःदक्षिणार्धेसवित्रेवा।एवंनैऋत्यंपूर्वार्धेवरुण
यादिबुधाधिपायानंतस्मिन्नार्धेमंदेजयंतायं०।वायव्यपद्मदक्षिणार्धेवा
महस्तेराजयक्ष्मणे०।।उत्तरार्धेरुद्रायं०ईशानपदार्धेउरसिअद्र्यःदक्षिणा
र्धेमुखेआपवत्साय०ततोंसपक्तिगतईशानपददक्षिणार्धेशिरसिशिखि
ने०तद्दक्षिणसार्धपदेपर्जन्याय०तद्दक्षिणपद्मेदक्षिणनेत्रेजयंताय०त
द्दक्षिणपद्मेदक्षिणांसेकुलिशायुधाय०तद्दक्षिणयेदक्षिणबाहौसूर्या
य०तद्दक्षिणयेदक्षिणबाहुवेवस्वताय०तद्दक्षिणसार्धदक्षिणकूर्परे
दक्षाय०तद्दक्षिणाग्नेयपदार्धदक्षिणप्रबाहौआकाशाय०तत्पश्चिमा
र्धदक्षिणप्रबाहुवेववायवे०तत्पश्चिमेसार्धदक्षिणमणिबंधेपूष्णे०तत्पश्चि
मयादक्षिणपार्श्वेवितथाय०तत्पश्चिमयादक्षिणपार्श्वेएवंगृहक्षताय०

तत्पश्चिमयोर्दक्षिणोरोयमाय० तत्पश्चिमेदक्षिणजानोर्गंधर्वाय० तत्प
श्चिमेसार्धपददक्षिणजंघायांभृंगराजाय० तत्पश्चिमेनैर्ऋत्यपदार्धेदक्षि
णास्फिजि० मगाय० तदुत्तरार्धपादयोःपितृभ्यः तदुत्तरेसार्धेवामास्फि
जिदौवारिकाय० तदुत्तरयोर्वामजंघायांसुग्रीवाय० तदुत्तरयोर्वामज
नोपुष्पदंताय० तदुत्तरयोर्वामोरौवरुणाय० तदुत्तरयोर्वामपार्श्वेअसु
राय० तदुत्तरेसार्धपदेवामपार्श्वेशोषाय० तदुत्तरेवायव्यार्धेवाममणि
बंधेपापाय० तत्पागर्धेवामप्रबाहोरोगाय० तत्पाक्सार्धेवामप्रबाहो
वेअहये० तत्पाग्द्वयेवामकूर्परेमुख्याय० तत्पाग्द्वयेवामबाहोभल्लाट
य० तत्पाग्द्वयेवामबाहवेवसोमाय० तत्पाग्द्वयेवामांसेसर्पाय० तत्पाक्सार्ध
वामश्रोत्रेदित्यै० तत्पागर्धेवामनेत्रेदितये० ततःउत्तरेवास्तोष्पतइतिवास्तो
ष्पतितोमंडलाद्बहिः ईशानादिषुचरक्यै० विदार्यै० पूतनायै० पापरा
क्षस्यै० ततःपूर्वादिषुस्कंदाय० अर्यम्णे० जंभकाय० पिलिपिच्छाय०

DR BHAU DAJI
डाक्टर भाऊदाजी इस्पारक्यसमारकम
MEMORIAL

पुनःपूर्वादिषुइंद्रादीन्• ततोमंडलादीशानेकलशंसंस्थाप्यतत्रवरुणंतत्रा
यामीत्यावाह्यपूजयेत्॥यथामेरुगिरेःशृंगंदेवानामालयःसदा॥तथा
ब्रह्मादिदेवानांममयज्ञेस्मिन्रोप्तवतिमार्थयेदिति॥ततउडुंबरादिसमित्ति
लाज्यैःस्वतंत्रस्रुवेइध्माविंशतिरष्टोवाप्रत्येकंततंनाममंत्रेणहुत्वा॥वास्तो
ष्पतइतिचतुर्भिर्हुत्वाॐवास्तोष्पतेनमइतिमंत्रेणपंचबिल्वफलानिहु
त्वास्विष्टकृदादिपूर्णाहुत्यंतंकृत्वा॥ततोमंडलदेवताभ्यःपायसबलिद
त्वाक्षुधपाजइतिस्रुक्कादिनामंउपरित्रिस्त्र्यावेष्टयित्वावास्तुकलशोदक
नयजमानमभिषिंच्यपुनःसंपूज्ययथाशक्तिदक्षिणांदत्वाब्राह्मणान्भोजय
दिति॥शारदातिलकेतुरुमोनोक्तः॥तिलाज्यादिद्रव्याणांविकल्पइतिमयातत्र
॥इतिवास्तुपूजा॥ ॥मात्स्ये॥उपोषितास्ततःसर्वेकुर्युरेवमधिवासनमि
ति॥पद्मेउपवासोप्यवेदेवमशक्तोनक्तमित्यपतइति॥सघाधिवासनंचाथ
कुर्याद्योविमनानरइतितत्रैवोक्तं॥अधिवासनंचैव॥तत्रद्वारपूजा॥पूर्व

द्वारेद्वारश्रिये०ऊर्ध्वदेहल्येअधःवामदक्षिणस्तंभयोर्गणेशाय०स्कंदाय०
द्वारस्थितकलशद्वयेगंगायै०यमुनायै०दक्षिणद्वारेद्वारश्रिये०ऊर्ध्वदेहल्ये०
अधःवामदक्षिणस्तंभयोःपुष्पदंताय०कपर्दिने०कलशद्वयेगोदायै०कृष्णा
ये०पश्चिमेद्वारश्रिये०ऊर्ध्वदेहल्ये०अधःस्तंभयोःनंदिने०चंद्राय०कलशद्व
येरेवायै०ताप्यै०उत्तरेद्वारश्रिये०ऊर्ध्वदेहल्ये०अधःस्तंभयोःमहाकालाय०
भृंगिणे०कलशद्वये०बाण्यै०वेण्यै०॥ ॥इतिद्वारपूजा॥ ॥अथतोरणपूजा॥
तत्रपूर्वेबहिर्हस्तमात्रेवटतोरणमाश्वत्थंवासुप्तद्रानामकंसुशोभननाम
कंवाशंखांकितमग्निमीळेइतिमंत्रेणन्यस्यसंपूज्यरुद्रबृहस्पतीतत्रन्य
सेत्॥पूजयेच्च॥तत्रैकःकलशःस्थाप्यः॥तत्रमहीद्यौरितिक्षत्रार्यत्ना॥ओषध
यःसमितियवप्रक्षेपः॥आकलशेष्विति कलशेनिधानंइमंमेगंगेइतिजलप्र
क्षेणंगंधद्वारामितिगंधंप्रक्षिपेत्॥याओषधीरितिसर्वौषधीःओषधयः
समितियवान्॥कांडात्कांडादितिदूर्वाःअश्वत्थेवइतिपंचपल्लवान्॥स्योना 36

पृथिवीतिपंचमृदः याःफलिनीरितिफलं॥सहिरत्नानीतिपंचरत्नानि॥हिर
ण्यरूपमितिहिरण्यं॥युवासुवासाइतिवस्त्राणिदिना वेष्टयेत्॥पूर्णादर्वीतिधा
न्यपूर्णपात्रमुपरिनिदध्यात्॥तत्रध्रुवावाहनंपूजनंच॥ततोदक्षिणे॥औडुंबर
प्लाक्षंवासुभद्रंविकटंवाचक्रांकिततोरणंइषेत्वोर्जेतिनिधाय॥चंदनादिचर्चि
तंकृत्वा॥सूर्यमंगारकंचतत्रन्यसेत्॥ततःपूर्ववत्कलशंस्थापयित्वातत्रधरामा
वाह्यार्चयेत्॥ततःपश्चिमेप्लाक्षमौडुंबरंसुकर्मसुभीमंवाग्दांकिततोरणंचअ
ग्नआयाहीत्यावाहनपूजनादिशुक्रंबुधंचतत्रन्यसेत्॥ततःपूर्ववत्कलशस्था
पनंतत्रवाक्पतिमावाह्यपूजयेच्च॥ततउत्तरेन्यग्रोधमाश्वत्थंपाळाशंवासु
होत्रंसुप्रभंवापभांकिततोरणंशंनोदेवीतिरितिनिधायपूजितंकृत्वासोमंके
तुंशनिंचतत्रन्यसेत्॥ततःकलशंस्थापयित्वातत्रविघ्नेशावाहनपूजनादि
ततःपूर्वद्वारशाखाद्वयेकलशद्वयंदध्यक्षतादियुक्तंपूर्ववत्स्थापयेत्॥एवं

तं कलशद्वयेन्यस्यार्चयेत्॥ततः पूर्वस्मिन्नृग्वेदिनाऋत्विजौ द्वावेकंवाशांतिसूक्तजपार्थंत्वेनत्वामहंवृणइतिप्रत्येकंऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदेवतः॥अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिवत्वाग्निमीळइतिपूजयेत्॥एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश॥संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवंनमस्ते॥भोईंद्रहागच्छेहतिष्ठेतींद्रसांगंसपरिवारंसायुधंसशक्तिकंद्वारकलशेआवाह्य॥त्रातारमिंद्रमितिपूजयित्वाआशुःशिशानइतिपीतांपताकांपीतंध्वजंचोच्छ्रयेत्॥ततऐरावतस्थंपीतवर्णंसहस्राक्षंदक्षिणवामहस्तस्थवज्रोत्पलमिंद्रंध्यात्वा॥ईशस्सुरपतिःश्रेष्ठवज्रहस्तोमहाबलः॥शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमइतिनत्वाइंद्रायसांगायसपरिवारायसायुधायसशक्तिकायतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततआचम्याग्नेयकोणेगत्वापूर्ववत्कलशंस्थापयित्वातत्रपुंडरीकमस्त्रंचसंपूज्यएह्येहिसर्वामरहव्यवाहमुनिप्रवर्यैरर्चितोभिजुष्ट॥तेजोवताळोकगणेनसार्धंममाध्वरंपाहिकवेनमस्ते॥भोअग्नेइहागच्छइहतिष्ठेतिसांगादिकमग्निंकलशेआवाह्य॥त्वंनोअग्नइतिसंपूज्यअग्निंधूतमितिरक्तंपताकांरक्तंध्वजंचोच्छ्रयेत्॥ततश्छागस्थंदक्षिणवामकरधृतशक्तिकमंडलुयज्ञोपवीतिनंअग्निंध्यात्वाआग्नेयःपुरुषोरक्तःसर्वदेवमयोव्ययःधूमकेतुरजोध्यक्षःतस्मैनित्यंनमोनमइतिनत्वाआग्नयेसांगायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततःकृताचमनोदक्षिणेगत्वाप्रतिद्वारशाखंपूर्ववत्कलशद्वयंस्थापयित्वावामनादिवग्गजंतत्रार्चयेत्॥ततोयजुर्वेदिनोद्वावेकंवादक्षिणद्वारेशांतिसूक्तजपार्थंत्वेनत्वामहंवृणइत्युक्त्वाकातरक्षोयजुर्वेदस्त्रेष्टुभोविष्णुदेवताःकाश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकंसंप्रार्थ्यइषेत्वोर्जेतिप्रोक्षयेत्॥ततःएह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्तेशुभाशुभानंदशुचामधीशशिवायनःपाहिमखंनमस्ते॥भोयमेहागच्छेहतिष्ठेतिसांगादियममावाह्ययमायसोममितिसंपूज्यकृष्णंपताकांकृष्णध्वजंचायंगौरित्यच्छ्रयेत्॥ततोमहिषारूढंधृतदंडपाशदक्षिणवा

मकरमंजनपर्वततुल्यमग्निसमलोचनंयमंध्यात्वासांगायुधमायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततआचम्यनैर्ऋत्यांपूर्ववत्कलशंस्थापयित्वाकुमुद
दिग्गजंदुर्जयंचसपूज्यएह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः॥
ममाध्वरंपाहिपिशाचनाथलोकेश्वरस्त्वंसगणंनमस्ते॥सोनिर्ऋतेइहागच्छेहतिष्ठेतिसांगमावाह्यअसुरांतमितिसंपूज्यनीलपताकांनीलध्वजंचमोक्षुण्इषु
धृयेत्॥नरास्थंखड्गहस्तंमहाबलंमहाकायंनीलबभ्रुरक्षसावेष्टितंनिर्ऋतिं
ध्यात्वा॥निर्ऋतिंखड्गहस्तंचसर्वलोकेकपावनं॥आवाहयामियज्ञेस्मिन्पू
जेयंप्रतिगृह्यतामितिं॥नेत्वासांगायनिर्ऋतयेएषमाषभक्तबलिंसमर्पया
मीतिबलिंदद्यात्॥ततआचम्यपश्चिमेगत्वापूर्ववत्प्रतिद्वारशाखंकलश
द्वयंनिधायअंजनदिग्गजंन्यस्याचयेत्॥ततःसामगाःखलिजाःखलिजावाःखासा
मवेदस्तुपिंगाक्षोजागतःशक्रदेवताः॥सामद्वाजस्तुविप्रर्क्षाणितिपाठमस्वकुर्वि ३९
तिप्रार्थ्यअग्नआयाहितिस्रुजयित्वाएह्येहियातुधानगणवारिधेनागणेनपर्जन्यस
हाप्सरोभिः॥विचाधरेंद्रमगीयमानंपाहित्वमस्मासगणंनमस्ते॥एकैका

सोवरुणेहागच्छेहतिष्ठेतिसांगंवरुणंमावाह्यतत्वायामीतिसंपूज्यश्वेतपताकांश्वेत
ध्वजंचेममेवरुणेतिस्रुक्त्यमकरस्थंपाशहस्तंकिरीटिनंश्वेतवर्णंवरुणंध्यात्वापा
शहस्तंचवरुणंमणिसंप्रतिमंश्वरं॥आवाहयामियज्ञेस्मिन्वरुणायनमोनमइतिनत्वा
सांगायवरुणायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततआचम्यवायव्यांपू
र्ववत्कलशंस्थापयित्वापुष्पदंतंसिद्धार्थंचतत्रपूजयित्वाएह्येहियज्ञेममरक्षणायस्था
दिरूढःसहसिद्धसंघैः॥प्राणाधिपःकालकवेसहायग्रहणपूजांभगवंनमस्ते॥सोवा
योइहागच्छेहतिष्ठेतिसांगादिवायुमावाह्यतववायवतेस्पतइतिसंपूज्यवायोशतमि
तिधूम्रांपताकांध्वजंचोक्त्वास्रुगादिरूढंचित्रांबरधरंयुवानंवरध्वजधरदक्षिण
वामहस्तंवायुंध्यात्वावायुमाकाशगंचैववपनंवेगवज्रतिं॥आवाहयामियज्ञेस्मि
न्पूजेयंप्रतिगृह्यतामितिअनाकाराग्रहोजाश्वयश्वादृष्टगतिदिवि॥तस्मात्पू
ज्योयजगतोवायवेहनमामितेइतिनत्वासांगायवायवेएतंमाषभक्तबलिंसम
र्पयामीतिबलिंदद्यात्॥ततआचम्योत्तरेप्रतिद्वारशाखंकलशद्वयंस्थापयित्वा

सार्वधेनोमंदिगजंन्यस्यपूजयित्वाअथर्वविद्ऋत्विजाउत्तरद्वारेशांतिसूक्त
जपार्थंत्वेनाहंवरणइत्युक्त्वाहंनेत्रोथर्वदोनुष्टुभोरुद्रदेवतःवेशंपायनाविघ्नं
शांतिपाठमस्वकुर्वितिघृार्घ्यंशंनोदेवीरितिपूजयेत्॥एह्येहियज्ञेश्वरयज्ञरक्षावि
घ्नस्वनक्षत्रगणेनसार्धं॥सर्वौषधीभिःपितृभिःसहैवगृहाणपूजांभगवंनमस्ते।
सोमेहागच्छहतिष्ठेतिसांगंसोममावाह्यवयंसोमेतिसंपूज्यहरितांप
ताकांध्वजंचाप्यायस्वेतिन्यस्यनरयुतपुष्पकविमानस्थंकुंडलहारकेयूरसंशोभि
तंवरदगदाधरदक्षिणवामहस्तंमुकुटितंमहोदरंस्थूलकायंरक्तपिंगलनेत्रंपीतवि
वस्त्रधायंकुबेरंध्यात्वा सर्वनक्षत्रमध्येतुसोमोराजाव्यवस्थितः॥तस्मैसोमायदेवायनक्षत्रप
तयेनमइतिनत्वासांगायसोमायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततआचम्यई
शान्यांगत्वापूर्ववत्कलशस्थापयित्वासुपतीकनामानंदिग्गजंमंगलंचनत्रपूजयित्वा एह्येहिवि
श्वेश्वरनस्त्रिशूलकपालखट्वांगधरेणसार्धं॥लोकेनयज्ञेश्वरयज्ञसिध्येगृहाणपूजांभगवं
नमस्ते॥ईशानेहागच्छेहतिष्ठेतिमावाह्यतमीशानमितिसंपूज्यध्वजंसर्ववर्णांवापताकांध्व
जंचअभित्वादेवसवितारितिउक्त्वाहरितंवरदत्रिशूलयुतंदक्षिणवामहस्तद्वयंत्रिनेत्रंभु ४०

द्धस्फटिकवर्णमीशानंध्यात्वावृषस्कंधसमारूढंशूलहस्तंत्रिलोचनं।आ
वाहयामियइहेस्मिन्पूजेयंप्रतिगृह्यतां।सर्वाधिपोमहादेवईशानःशुक्लेई
श्वरः॥शूलपाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमइतिनत्वासांगायेशानायते
तंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततआचम्येशानपूर्वयोर्मध्ये
गत्वा॥एह्येहिपालेतोधरामरेंद्रनागांगनाकिंनरगीयमानयक्षोरगेंद्रामर
लोकसंघैरनंतरक्षाध्वरमस्मदीयं।मोअनंतेहागच्छेहतिष्ठेतिसांगमनंतमा
वाह्यआयंगौरितिसंपूज्यमेघवर्णांश्चेतांवापताकांध्वजंच।आयंगौरित्यु
च्छ्रित्यअनंतंशयनासीतंफणासप्तकमंडितंपद्मशंखधरोर्ध्वाधोदक्षि
णकरद्वयंचक्रगदाधरोर्ध्वाधोवामकरद्वयंनीलवर्णमनंतंध्यात्वा।मोसावनं
तरूपेणब्रह्मांडंसचराचरं॥पुष्पवद्धारयेन्मूर्ध्निस्तस्मैनित्यंनमोनमइति
नत्वासांगायानंतायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततआ
चम्यनैर्ऋत्यपश्चिमयोर्मध्येगत्वा। एह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्ध

पितृदेवताभिः। सर्वस्यधातास्यमितप्रभावोविशाध्वरंनः सततंशिवाय। ओ ब्र
ह्मन्निहागच्छहतिष्ठतिब्रह्माणमावाह्येत्। ब्रह्मज्ञानमितिसंपूज्यरक्तांप
ताकांध्वजंचब्रह्मज्ञानमित्युक्त्वाचतुर्मुखंहंसारूढंअक्षमालाकुशमुष्टिध
रोर्ध्वाधोदक्षिणेकरद्वयंस्रुवकमंडलुधरोर्ध्वाधोवामकरद्वयंश्मश्रुलंजटिलंल
बोदरंरक्तवर्णंब्रह्माणंध्यात्वापद्मयोनिश्चतुर्मूर्तिर्वेदव्यासः पितामहः॥यज्ञा
ध्यक्षश्चतुर्वक्त्रस्त्रस्मैनित्यंनमोनमइतिन्त्वासागायब्रह्मणेएतंमाषभक्तबलिं
समर्पयामीतिबलिंदद्यात्। नैर्ऋत्यपश्चिमांतराले नंतबलिदानमीशानपूर्वोत्त
राले ब्रह्मबलिदानंचेतिरुद्रनारायणः। ततआचम्यमंडपमध्येसुचंदंडा द
शहस्तदीर्घंत्रिहस्तविस्तृतःपंचहस्तदीर्घोहस्तविस्तारोवामहाध्वजःकिं
किण्यादियुक्तःइंद्रस्यवर्णोहतिस्थाप्यतत्रैवब्रह्मपूजनंचाततोमंडपस्तंभे
षुसर्वेभ्योदेवेभ्योनमःपन्नगेभ्योनमइत्यर्चयेत्। ततःपूर्वभागेउपलिप्य ४१
भूमावुपवेश्यत्रैलोक्येयानिभूतानिस्थावराणिचराणिच। ब्रह्मविष्णुशि
वैःसार्धंरक्षांकुर्वंतुतानिमे। देवदानवगंधर्वयक्षराक्षसपंनगाः। ऋषयोमा
नवोगावोदेवमातरएवच। सर्वेममध्वरेरक्षांप्रकुर्वंतुमुदान्विताः। ब्रह्माविष्णुश्चरु
द्रश्चक्षेत्रपालगणैःसहारक्षंतुमंडपंसर्वेचांतुरक्षांसिसर्वतइतिपठित्वात्रैलोक्यरक्षेभ्यः
स्थावरेभ्योभूतेभ्योनमः। त्रैलोक्यस्थेभ्यश्चरेभ्योगोभ्योदेवमातृभ्योनमइतिप्रत्येक
संपूज्यमाषभक्तबलिंदद्यात्। ततोयजमानःसर्वैऋत्विग्भिःसहप्राग्द्वारेणमंडपंप्रवि
श्यास्यदक्षिणद्वारपश्चिमदेशेउपविश्यगुर्वादयोयथाविहितंकर्मकुरुध्वमितिव
देत्। प्रतिकुंडमेकैकःकलशऋत्विग्भिःस्थाप्यइतिकेचित्। गुरुणास्थाप्यइत्यन्ये।
ततऋग्वेदादिक्रमात्प्रागादिकुंडेषुऋत्विजोग्निंस्थापयेयुः। ततोगुरुर्यजमा
नान्वितोग्रहवेद्यांसर्वतोभद्रमंडलदेवतास्थापयेत्। इतिपितामहचरणा॥ ॥यथा॥
॥ ॥अद्येत्यादिमंडलदेवतास्थापनमहंकरिष्यइतिसंकल्पयेत्। स्थापयेत्। तत्र
मध्येब्रह्माणं। ब्रह्मज्ञानंगौतमोवामदेवोब्रह्मात्रिषुप्। स्थापनपूजनेविनि
योगः॥ एवमुत्तरत्र॥ ॐ ब्रह्मज्ञानं। ततउदीचीमारभ्यवायव्यपर्यंतंकुबेरादीनांघं

तान्अष्टौलोकपालान्यतत्र आप्यायस्वगौतमःसोमोगायत्री।ॐआप्यायस्व०
२अग्निंत्वाजीगर्तःशुनःशेपईशानोगायत्री।ॐअग्निंत्वादेवसवि०३इंद्रंवोमधुछंदा
इंद्रोगायत्री।ॐइंद्रंवोवि०४अग्निंमेधातिथिरग्निर्गायत्री।ॐअग्निंदूतंकण्वयमाय
सोमंयमोयमोनुष्टुप्।ॐयमायसोमंसु०५सोषुणोघोरःकण्वोनिर्ऋतिर्गायत्री।ॐ६सोषुणः
पुरा०७तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्।ॐतत्वायामि०८वायोशतंगौतमोवामदेवोवायुरनुष्टुप्।ॐवायोशतं०९वायुसोममध्येअष्टौवसून्।जम
याअत्रमैत्रावरुणोवासिष्ठोवसवस्त्रिष्टुप्।ॐजमयाअत्रव०१०सोमेशानमध्ये
एकादशरुद्रान्।आरुद्रासःश्यावाश्वएकादशरुद्राजगती।ॐआरुद्रास०११ई
शानेंद्रमध्येद्वादशादित्यान्।त्वांनुसोमदोमस्योद्वादशादित्यागायत्री।ॐत्वां
नुक्षत्रिया०१२इंद्राग्निमध्येश्विनौअश्विनाकुत्सोगौतमोश्विनाबृहती।ॐअश्विना
वर्तिः०१३अग्नियममध्येविश्वेदेवान्सपेतकानूओमासोमधुछंदोविश्वेदेवागायत्रीॐ ४२
ओमासः१४यमनिर्ऋतिमध्येसप्तयक्षान्अग्नियंवाग्नदेवःसप्तयक्षाःप्रकृतिःॐअ

शिखंदेवंस०१५निर्ऋतिवरुणमध्येभूतनागान्।आयंगौःसार्पराज्ञीसर्पगा
यत्री।ॐआयंगौः५०१६वरुणवायुमध्येगंधर्वाप्सरसः।अप्सरसामेतृशऋ
ष्यृंगोगंधर्वाप्सरसोनुष्टुप्।ॐअप्सरसांगंधर्वा०१७ब्रह्मसोममध्येस्कंदंनंदी
श्वरंभृंगंमहाकालंच॥कुमारंकुमारःस्कंदस्त्रिष्टुप्।कुमारंमाता१८ऋषभ
मृषभोवैराजोऋषभोनुष्टुप्।ऋषभंमा०१९ब्रह्मेशानमध्येदक्षादीन्सप्त॥
अदितिर्लोक्योबृहस्पतिर्दक्षोनुष्टुप्।ॐअदितिर्द्यौर्ज०२०ब्रह्मेंद्रमध्येडुर्गांवि
छुंच।तामग्निवर्णांसोमरिडुर्गास्त्रिष्टुप्।ॐतामग्निवर्णां०२१इंदंविष्णुःकाण्वो
मेधातिथिर्विष्णुर्गायत्री।ॐइदंविष्णुर्वि०२२ब्रह्माग्निमध्येस्वधां।उदीरतांशंखः
स्वधात्रिष्टुप्।ॐउदीरताम०२३ब्रह्मयममध्येमृत्युरोगान्।परंमृत्योःसंकु
सुकोमृत्युरोगानुस्त्रिष्टुप्।ॐपरंमृत्यो०२४ब्रह्मनिर्ऋतिमध्येगणपतिं।गणा
नांत्वागृत्समदोगणपतिर्जगती।ॐगणानांत्वा०२५ब्रह्मवरुणमध्येजपः।शं
नोदेवीरभीष्टयेसिंधुद्वीपआपोगायत्री।ॐशंनोदेवीर०२६ब्रह्मवायुमध्ये

मरुतः मरुतोयस्यराङ्गणोमरुतोगायत्री॰ मरुतोयस्य॰२७ ब्रह्मणः पादमूले कर्णिकायः दृष्टीं॥स्योना
मेधातिर्ऋषिर्भूमिगायत्री॰ॐ स्योनापृथि॰२८ तत्रैव गंगादिनद्यः इमंमे गंगे यमुने सरस्वति शुतुद्रि
सरस्वत्योजगती॰ इमंमेगंगे॰२९ तत्रैवसप्तसागरान्॥ धाम्नोधाम्नोराजन्निति वरुणनोमुंच॥ यदापो
अघ्न्याइतियरुणेतिशपामहेततोवरुणनोमुंच॥ मयिवापोमोषधीर्हिंसीरतोविश्वव्यचाभूत्वेतो
वरुणनोमुंच॥३० तदुपरिमेरुनाम्ना॥ बाह्येसोमादिसमीपेक्रमेणायुधानि॥ गदां॰त्रिशूलं॰वज्रं॰श
क्तिं॰दंडं॰खड्गं॰पाशं॰अंकुशं॰तदाह्येपूर्वादिएडीं॰कौमारीं॰ब्राह्मीं॰वाराहीं॰चामुंडां॰वैष्णवीं॰माहेश्व
रीं॰वैनायकीं॰इत्यष्टौशक्तीः प्रतिष्ठाप्यप्रत्येकंसहावाह्यपूजयेत्॥ ततस्तस्यामेववेद्यावस्त्रलिखि
तवक्ष्यमाणमंडलेआदित्यादिदेवताः स्थापयेत्पूजयेत्च॥ अस्मिन्कर्मणिग्रहादिस्थापनंपूजनं
चकरिष्येप्रणवस्यब्रह्मा॥ ऋषिः परमात्मासविर्वादेवता। देवीगायत्रीछंदः व्याहृतीनांक्रमेण
जमदग्निभरद्वाजभृगवऋषयः अग्निवायुसूर्यादिदेवताः देवीगायत्रीदेवीबृहत्यश्छंदांसि
॥ सूर्यादिवाहनेविनियोगः॥ केचिन्मंत्रानप्यावाहनेआकृः तत्रयद्मध्येवर्तुलंप्राङ्मु
खंसूर्यंरक्तपुष्याक्षतैः आकृष्णेनहिरण्यस्तूपः सविताऽत्रिष्टुप्सूर्यावाहनेविनियोगः॥

ॐभूः॥आकृष्णेनरजसा॰ॐभुर्भुवःस्वः॥कलिंगदेशोद्भवकाश्यपगोत्रसूर्यहागच्छेह्यावाह्येहतिष्ठेतिस्थाप
येत्॥एवंसर्वत्रमंत्रांतेव्याहृतीरुक्काइहागच्छेहतिष्ठेतिस्थापयेत्॥ ततःआग्नेयेचतुरस्रेप्रत्यङ्मुखंसो
मंश्वेतपुष्याक्षतैः आप्यायस्वगौतमःसोमोगायत्रीसोमावाहने॰यमुतिरोद्भवआत्रेयसगोत्रसो
म॰२ ततोदक्षिणेत्रिकोणेदक्षिणामुखंभौमरक्तपुष्याक्षतैः अग्निर्मूर्धाविरूपोंगारकोगायत्रीअं
गारकावाहनेविनियोगः अवंतीसमुद्भवभारद्वाजगोत्रभौम॰३ ततईशान्येबाणाकारेउदङ्मुखंब
बुधंपीतपुष्याक्षतैः उद्बुध्यध्वंबुधःसोम्योबुधःस्त्रिषुपूबुधावाहने॰मगधदेशोद्भवआत्रेयसगोत्रबु
ध॰४ ततउत्तरतोदीर्घचतुरस्रेउदङ्मुखंबृहस्पतिपीतपुष्याक्षतैः बृहस्पतेऽतिसदोबृहस्पतिस्त्रि
षूसिंधुदेशोद्भवआंगिरसगोत्रबृहस्पते॰५ ततःपूर्वेपंचकोणेप्राङ्मुखंशुक्रंशुक्रपुष्याक्ष
तैःशुक्रपारशरःशुक्रोद्वियादाविराट्भोजकटदेशोद्भवभार्गवसगोत्रशुक्र॰५ ततःपश्चिमेध
नुषिप्रत्यङ्मुखंशनिकृष्णपुष्याक्षतैः शंनोदेविरभिष्टयेशंयोरभिस्रवंतुनः शनिरुक्षिकरःसौरा ष्ट्रजकाश्यपगो
त्रशनैश्चर॰७ ततोनैऋत्येधूम्रकारेदक्षिणामुखंराहुंकृष्णपुष्याक्षतैः कयानोवामदेवो
राजुर्मिऋ॥ राक्षोवाह॰राठिनापुरोद्भवपैठिनसिगोत्रराहो॰८॥ ततोवायव्येध्वजाका

रदक्षिणामुखं केतुं धूम्रपुष्पाक्षतैः। केतुं मधुछंदाः केतवो गायत्री। अंतर्वेदीसमुद्भवजैमिनिसगोत्रकेतोः सर्वेषामादित्याग्निमुखावा अथाधिदेवताः श्वेतपुष्पाक्षतैः क्रमात्। सूर्यादीनां दक्षिणतस्त्र्याद्याः। त्र्यंबकं वसिष्ठोरुद्रोनुष्टुप्। रुद्रावाहनेवि० सर्वत्र ज्ञेयः। ॐ त्र्यंबकं० ॐ भूर्भुवस्वः ईश्वराय० ईश्वरं० गोरीमिमाय दीर्घतमाउमाज गती। सोमदक्षिणेपार्श्वे० यदक्रंदोदीर्घतमास्कंदस्त्रिष्टुप्। ३ विष्णोर्नुकं दीर्घतमाविष्णु स्त्रिष्टुप्। ४ ब्रह्मजज्ञानं गोतमोवामदेवो ब्रह्मात्रिष्टुप्। ५ इंद्रंवो मधुछंदाइंद्रो गायत्री। ६ यमायसोमं यमोयमोनुष्टुप्। ७ मोषुणो घोरः कण्वः कालोगायत्री। ८ उषोवाजं प्रस्कण्व श्चित्रगुप्तोबृहती। ९ एवमेवमुक्तपुष्पाक्षतैः यज्ञाणांवामेमंत्रांते व्याहृतीरुक्त्वा हागच्छ हतिष्ठेति चोक्त्वा प्रत्यधिदेवतास्थापयेत्। अग्निंकाण्वोमेधातिथिरग्निर्गायत्री। अग्निंहूतं १ अप्सुमेमेधातिथिरापोनुष्टुप्। २ स्योनामेधातिथिर्मित्रोगायत्री। ३ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री। ४ इंद्रश्रेष्ठाःनिरुत्समद इंद्रस्त्रिष्टुप्। ५ इंद्राणी वृषाकपिरिंद्राणीपंक्तिः। ६ प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। ७ आयं

गौः सार्परा ज्ञी सर्पागायत्री। ८ ब्रह्मजज्ञानं गोतमोवामदेवो ब्रह्मात्रिष्टुप्। ९ ततः शुक्लपुष्पाक्षतैः। विनायकादीन्पंचागणानांत्वा गृत्समदोगणपतिर्जगतीरा होड्त्तरतो विनायकंजातवेदसेकश्यपोदुर्गात्रिष्टुप्। शनैरुत्तरतोदुर्गांतवा योयश्चअंगिरसोवायुर्गायत्री। रवेरुत्तरतोवायुं ३ एतान्मंत्रान्पठंतिसांप्रदा यिकाः। तत्र केषुचिन्मंत्रेषुमूलंविचिंत्यं। आदित्यस्यवत्सआकाशोगायत्री। राहो र्दक्षिणेआकाशं ४ एषोउषाप्रस्कण्वोश्विनोगायत्री। अश्विनाविहागच्छतमिहतिष्ठत मितिकेतोर्दक्षिणेश्विनौ। ५ एतानिविनायकादिस्थानानिचिंतामणौ। विनायका दीन्पंचउत्तरतएवेतिसांप्रदायिकाः। एवंद्वात्रिंशद्देवदेवता इतिरूपनारायणाद्य यः। हेमाद्रौतुलोकपालानामपिसूर्याग्निमुखानांदिक्षुरेकस्थापनमुक्तं। इंद्रंविश्वाजेता मधुछंदस इंद्रोनुष्टुप्। इंद्रइहागच्छहतिष्ठेतिपूर्वेइंद्रं। एवमुत्तरत्र। १ अग्निमेधातिथि रग्निर्गायत्री। २ यमायसोमं यमोयमोनुष्टुप्। ३ मोषुणोघोरः कण्वोनिर्ऋतिर्गायत्री। ४ त्वं नोअग्नेवामदेवोवरुणस्त्रिष्टुप्। ५ तववायोव्यश्वोवायुर्गायत्री। ६ सोमोधेनुंगोतमः सोम

स्त्रिष्टुप्। ७ तमीशानं गोतम ईशानोजगती। ८ सहस्त्रशीर्षानारायणोनंतोनुष्टु
प्। ईशानपूर्वयोर्मध्ये अनंतं ९ ब्रह्मजज्ञानं गोतमो वामदेवो ब्रह्मास्त्रिष्टुप्। ने ऋत्यपश्चि
मयोर्मध्ये ब्रह्माणं। १० ततःउत्तरेक्षेत्रपालस्य वामदेवःक्षेत्रपालोनुष्टुप्। वास्तोष्पते
वसिष्ठोवास्तोष्पतिस्त्रिष्टुप्। ततोलक्षहोमश्चेदिंद्रोमित्रमनेना। सामध्वनिशरी
रस्त्ववाहनंपरमेष्ठिनः। विषापहरोनित्यमतः शांतिंप्रयच्छमेसनेननोत्तरंग
रुमंत्रमावाह्यवेः स्वेशेषं। सोमस्याग्नेवास्कि०सोमाग्नेत्वस्कं०बुधोत्तरकर्को
टकं०बृहस्पतेरंगपर्व०शुक्रोत्तरमूरुपर्व०शनिपश्चिमेशंखपालं०राहोः
पुरंकबलं०केतोःपुरःकुलिकं०पीडासाच्यामुखिन्यादिसप्तनक्षत्राणि। वि
ष्कंभादिसप्तयोगान्। बवबालवकरणे। सप्तद्वीपानि। ऋग्वेदः। दक्षिणेपुष्या
दिकौलवतेतिलकरणे। ध्रुवादियोगान्। सप्तसागरान्। यजुर्वेदः। पश्चिमेस्वा
त्यादिसप्तनक्षत्राणि। वज्रादिसप्तयोगान्। गरवणिजकरणे। सप्तपा
तालं सामवेदः। उत्तरे। अभिजिदादिनक्षत्राणिसप्त। साध्यादिदेवयोगा

निविष्टिकरणं। भूरादिसप्तलोकान्। अथर्ववेदः। वायव्ये ध्रुवंसप्तऋषी
श्च। अथयथावकाशं०गंगादिसप्तसरितः सप्तकुलाचलान्ध अष्टोवसून्०
एकादशरुद्रान्०द्वादशादित्यान्०एकोनपंचाशन्मरुतः०षोडशमातृः०षट्कृ
त्तून्०द्वादशमासान्०द्वेअयने०पंचदशतिथीन्०षष्टिसंवत्सरान्। सुपर्णो
न्नागान्। सर्पान्यक्षान्नागांस्सर्पान्यक्षान्गंधर्वान्विद्याधरान्अप्सरसः र
क्षांसिभूतानिमनुष्यानिति। कोटिहोमेतुवेदः पूर्वेब्रह्माणंमध्येजनार्दनं०
पश्चिमेरुद्रं०उत्तरेस्कंदमित्येतानप्यावाहयेत्। ततोस्मिन्कर्मणिदेवता
परिग्रहार्थमाधानंकरिष्य इतिसंकल्प्य चक्षुषीआज्येनेत्येतमुक्त्वा
सूर्यादिग्रहान्समिदाज्यनैवेद्यशेषचरुभिरष्टसहस्त्राष्टशताष्टावि
शतिअष्टान्यतमसंख्याधिदेवताविनायकादीन्लोकपालांश्चासुक
संख्ययाएतैरेवद्रव्यैःक्षेत्रपालादींश्चासुकसंख्यया सूर्याद्याःसर्व दे
वताःदशसंख्यातिलाहुतिभिःअग्निंवायुंसूर्यंप्रजापतिंचप्रत्येकंपंच

विंशतिशतमिताभिस्तिलाहुतिभिर्यक्ष्ये। लक्षहोमेपंचविंशतिसहस्रमिताहुतिः
कोटिहोमेपंचाविंशतिलक्षमिताभिरिति विशेषः। ततः शेषेण स्विष्टकृतमित्यादि
यक्ष्ये इत्यंतमुक्त्वा समिद्घृताद्याज्यनिर्वापादिक्रमेणगुडौदनादीन्नवान्यांश्चस्रुक्
स्रुग्यो विंशतिरिति द्वात्रिंशन्नवेववाचरुन्स्रुपयित्वापंचाग्निः षोडशाग्निर्वापंचो
पैः संपूजयेत्। तत्र वस्त्राणिग्रहवर्णानि। रविसोमयोरक्तचंदनंचेंद्रशुक्रयोः श्वेत
चंदनंबुधगुर्वोः कुंकुमयुतंशनिराहुकेतूनां कृष्णागरुपुष्पाणितत्तद्वर्णानिधूपास्तु
सल्लकीनिर्यासंघृताक्तयवाराल्वमगरुसिल्हकंबिल्वयुतागरुगुग्गुलुलाक्षालवंगी
क्रमाज्ज्ञात्वादद्यादुद्दीप्यस्थेतिसर्वेभ्योदीपंदत्वागुडौदनंपायसंनीवारौदनंसी
रयुतषष्टिकौदनंदध्योदनंघृतौदनंतिलमाषयुतमोदनंमांसौदनंचित्रौदनंक्रमो
निवेदयेत्। अधिदेवताद्यस्तुवासोगंधपुष्पाणिश्वेतानिगुग्गुलुधूपः नैवेद्यंपाय
सादियथालाभं सूर्यादिद्वात्रिंशतामन्येषांचसर्वेषांपूजापद्धत्यनुसमयेनेवात
तोवेदीशान्यांकलशंसंस्थाप्यतत्रवरुणमावाह्यसंपूज्याग्निमंत्रयेत्॥ तद्यथा। क
लशस्यमुखेवि० मूलेतत्र० कुक्षौतुसाग० ऋग्वेदोथय० अंगैश्चस० अत्रगायत्रीसा०

आर्यातुयजमानस्यदुरितक्षयकारकाः। देवदानवसंवादेमथ्यमानेमहोदधौ। उ
त्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं। त्वत्तोयेसर्वतीर्थानिदेवाः सर्वेत्वयिस्थिताः।
त्वयितिष्ठंतिभूतानित्वयिप्राणाः प्रतिष्ठिताः। शिवः स्वयंत्वमेवासिविष्णुस्त्वंचप्रजा
पतिः। आदित्यावसवोरुद्राविश्वेदेवाः सपैतृकाः। त्वयितिष्ठंतिसर्वेपियतः कामा
फलप्रदाः। त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव। संनिध्यंकुरुमेदेवप्रसन्नोभव
सर्वदा। ततः फलपुष्पमालाशोभितंवितानं बृहस्पतिदेवतंसूर्यादिभ्यइदंनममेति
उत्सृज्यग्रहवेद्यपरिधीन्यात्वा ततश्चवासादनाद्याज्यभागांतेयजमानः सर्वा आहु
हिताः सूर्यादिदेवताः अग्निंवायुंसूर्यंप्रजापतिंइंद्रंचोद्दिश्यसमिदाज्यचरुतिलान्
होतुमुत्सृज्यनममेतिस्रुजेत्। ततऋत्विजः समिदाज्यनैवेद्यशेषचरून्क्रमेणावा
हिताभ्योदेवताभ्योष्टसहस्राद्यन्यतमसंख्ययासमस्तव्याहृतिभिर्वोक्ष्यमाणस्त
न्मंत्रैर्वाहुत्वाघृताक्तिलैस्ताभ्य एवदेवताभ्यः प्रत्येकंदशदशाहुतीर्हुत्वासोमंरा
जानमितिस्विष्टकृतंहुत्वा व्यस्तसमस्तव्याहृतिभिस्तिलैर्युतंलक्षंकोटिंवाजुहुयुः।
तत्रहोमेऋग्वेदिनस्तावदावाहनोक्तानेवमंत्रान्पठंति। यजुर्वेदिनोतूच्यंते। आरुक्षेन

हिरण्यस्तूपः सवितात्रिष्टुप्॥सूर्यप्रीतयेतिलाज्यहोमेविनियोगः॥ॐआकृष्णेनरजसा०श्यन्त्वाहाइदंसू
र्याय०एवंसर्वत्र॥इमंदेवावरुणाःसोमोयमुःइमंदेवाःनोराजा२अग्निर्मूर्धाविरूपोंगारकोगायत्री॥
उद्बुध्यस्वपरमेष्ठीबुधास्त्रिष्टुप्४बृहस्पतयेगृत्समदोबृहस्पतिस्त्रिष्टुप्॥अन्नोप्रजापतिअग्निस
रस्वतींद्राः शुक्रोजगती५शंनोदध्यङ्ङाथर्वणःशनिर्गायत्री०कयानोवामदेवोराहुर्गायत्री८के
तुंमधुच्छंदाःकेतवोगायत्री।अथाधिदैवतानां॥त्र्यंबकंयजामहेऋङ्नुष्टुप्॥अत्रप्रणीतादकंस्पृ
शेत्॥श्रीश्चेत्युत्तरनारायणउमात्रिष्टुप्।२यदक्रंदोभास्करजमदग्निर्दीर्घतमाःस्कंदास्त्रिष्टुप्३
विष्णोरराटमुतथ्योविश्वामित्रोयमुःॐविष्णोरराटम०वेत्वा४अब्रह्मन्प्रजापतिर्ब्रह्मायमुःआब्रह्म
न्कल्पतां५सजोषाविश्वामित्रइंद्रस्त्रिष्टुप्सजोषाइंद्र०५असियमोभास्करजमग्निर्दीर्घत
मसोयमस्त्रिष्टुप्७अत्रप्रणीतोदकंस्पृशेत्॥कार्षिरसिदध्यङ्ङाथर्वणःकालोनुष्टुप्॥अ
त्रापिप्रणीतोदकंस्पृशेत्॥चित्रावसोऋषयश्चित्रगुप्तोजगतीचित्रावसोस्व०शीय०९अ
थप्रत्यधिदेवतानां०अग्निर्मूर्धेतिविरूपोग्निर्गायत्री१अक्षंतन्नबृहस्पतिःपुरउष्णिक्२स्योनामे
धातिथिःपृथिवीगायत्री३इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री५त्रातारंगाग्यइंद्रस्त्रिष्टुप्५अ
दित्येदध्यङ्ङाथर्वणइंद्राणीयमुः६अदित्यैरास्ना०प्रजापतेर्वरुणःप्रजापतिस्त्रिष्टुप्७न

४७

मोअस्तुदेवाःसर्पाअनुष्टुप्।८ब्रह्मप्रजापतिर्ब्रह्मास्त्रिष्टुप्९अथविनायकादिपंचानां।
गणानांत्वाप्रजापतिर्गणपतिर्यमुःगणानांत्वा०मम१अंबप्रजापतिर्दुर्गानुष्टुप्।२वातोगंधवा
र्वावातउष्णिक्३प्रमाणंतआवाहनेविनियुक्तानप्येतान्होमेपिपठंति।तद्ध्यानंस्वप्रमा
णकंएव।अन्येषांतूच्यते।आवोराजानंवामदेवोरुद्रस्त्रिष्टुप्।आपोहिष्ठाअंबरीषः
सिंधुद्वीपउमागायत्री।स्योनामेधातिथिःस्कंदोगायत्री।इदंविष्णुर्मेधातिथिर्विष्णु
र्गायत्री।त्वमिन्द्रप्रथमोब्रह्माबृहती।इंद्रमिद्देवतातयउक्थंस्तुगिंद्रस्त्रिष्टुप्।आ
यंगौःसार्पराज्ञीयमोगायत्री।ब्रह्मजज्ञानंगौतमोवामदेवःकालस्त्रिष्टुप्।यदाजानं
कौशिकश्चित्रगुप्तोनुष्टुप्।अग्निंदूतंकाण्वोमेधातिथेरग्निर्गायत्री।१उदुत्तमंगौ
तमोवामदेवआपस्त्रिष्टुप्।२पृथिव्यांतरिक्षेविष्णुःपृथिव्युष्णिक्।३सहस्रशीर्षा
नारायणोविष्णुरनुष्टुप्४इंद्रायेंदोमरुत्वत५उत्तानपर्णेसुभगेऽप्रजापतेर्हिर
ण्यगर्भःप्रजापतिस्त्रिष्टुप्७नमोस्तुसर्पेभ्योदेवाःसर्पाअनुष्टुप्।८एषब्रह्माप्रजा
पतिर्ब्रह्मादिपदागायत्री९आतूनइंद्रःकुसीदःकाण्वोगणपतिर्गायत्री।ज्ञातवेदसे
कश्यपोदुर्गास्त्रिष्टुप्।आदित्यस्यआकाशोगायत्री।क्राणात्रितोवायुरुष्णिक्।आकाशा

दिभ्यस्तु स्वापनमंत्राएवा शेषवासुक्यादिभ्यस्तु प्रणवाद्याः स्वाहांतानाममंत्राण
वालक्षकोटिहोमयोरिंद्रमित्रमित्यनेनगरुत्मद्धोमः कोटिहोमेतुब्रह्मजज्ञानमित्यनेन
इंद्रस्कंदेभ्योपिनाममंत्रैर्होमः ततोयजमानोमंडपद्वाराकलशसमीपेत्रातारमिंद्र
गर्गइंद्रस्त्रिष्टुप् इंद्रप्रीत्यर्थंबलिदानेवि० त्रातारमिं० इंद्रायसांगायसपरिवारायसा
युधायसशक्तिकायअमुंसदीपंमाषभक्तबलिंसमर्पयानममेतिसदीपंमाषभक्तब
लिंदत्वाभोइंद्रदिशंरक्षबलिंभक्षममसकुटुंबस्यायुःकर्तारक्षेमकर्तारशुभकर्तारशांति
कर्तापुष्टिकर्तातुष्टिकर्तारभवेतिप्रार्थयेत् एवमग्नेयादिषुहोमोक्ताग्न्यादिमंत्रैब
लिदानंप्रार्थनंच॥ एवमधिदेवताप्रत्यधिदेवतासहितेभ्यःसूर्यादिग्रहेभ्योपिहो
मोक्तैस्तत्तन्मंत्रैःविनायकदुर्गावाय्वाकाशाश्विवास्तोष्पतिक्षेत्राधिपतिभ्यस्त
तन्मंत्रैर्होमोक्तैरेवाततआचार्योयजमानोन्वारब्धःस्रुचिस्रुवेणद्राक्षावारंच ४८
तुर्वारंवानालिकेरादिफलसंयुक्तमाज्यंगृहीत्वापूर्णाहुतिंजुहुयात्तत्रमंत्राः॥
समुद्राद्ऊर्मिरितितच्चस्यगोतमोवामदेवोग्निस्त्रिष्टुप्पूर्णाहुतौवि० एवमग्ने
पिविनियोगः॥ मूर्धानंदिवोमरुषाजोवैश्वानरस्त्रिष्टुप्पुनरग्निर्वसुनःपा

रादित्यास्त्रिष्टुप्पूर्णादर्विविश्वेदेवाःशतक्रतुरनुष्टुप्सप्तेअग्नेसप्तवा
नग्निर्जगतीध्रुवासंतेवामदेवआपोजगतीध्रुवासंतेऽग्नयेस्वाहेतियजमानस्रुद्
रमग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक्रतवेसप्तवतेअग्नयेअद्भ्यश्चनममेतियजे
त्काक्षीयानांतुमूर्धानंदिवइत्येवपूर्णाहुतिमंत्रः॥ अग्नयइदंनममेतित्यागः॥ सामगानां
तुपूर्णाहोमस्यप्रजापतिर्ऋषिर्गायत्रीछंदइंद्रोदेवतायशस्कामस्ययजनीयप्रयो
गेवि० पूर्णाहोमंयशसाजुहोमियोस्मेजुहोमिवरदंमस्मेददातिवरुंवण्योयशसाभामिलो
केस्वाहेत्यनेनस्रुवेणवृहोमः॥ इंद्रायेदंनममेतित्यागः॥ ततोवसोर्धारायांहोष्या
मीतिसंकल्प्ययजमानोवसोर्धारांजुहुयात्॥ मंत्रास्तु॥ अग्निमीळेतिनवानांमधु
छंदाअग्निर्गायत्रीवसोर्धारायांविनियोगः॥ विष्णोर्नुकमितिषण्णांदीर्घतमाविष्णु
स्त्रिष्टुप्॥ आतेपितरितिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप्॥ स्वादिष्ठयेतिनवानांम
धुछंदापवमानसोमोगायत्री॥ महावैश्वानरसाम्नोमहावैश्वानरऋषिर्वैश्वानरोदे
वतापथ्याबृहतीछंदः॥ ज्येष्ठसाम्नोभारद्वाजऋषिः॥ वैश्वानरोदेवता॥ त्रिष्टुप्छंदः॥
वसोर्धारायांवि० वसोर्धारांजुहोत्यनुवाकानपिपठेतिशेषः॥ एवंवसोर्धारांहुत्वा

पूर्णपात्रविमोकादि यथाशास्त्रं समाप्य आचार्यसहिता ऋत्विजः सर्वौषधीभि
रनुलिप्तांगं पत्नीपुत्रादिसहितं यजमानं स्वस्वशास्त्रीयैर्मंत्रैर्नवग्रहसमीपस्थक
लशोदकेन चाभिषिंचेयुः। घोराणेश्च। ते च। सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्व
राः। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च भवंतु विजया
यते। आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा। वरुणः पवनश्चैव धनाध्यक्षस्तथा
शिवः। ब्रह्मणासहिताः सर्वे दिक्पालाः पांतु ते सदा। कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः
श्रद्धाक्रियामतिः। बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः। एतास्त्वामभिषिं
चंतु देवपत्न्यः समागताः। आदित्यश्चंद्रमा भौमा बुधजीवसितार्कजाः। ग्रहास्त्वा
मभिषिंचंतु राहुः केतुश्च तर्पिताः। देवदानवगंधर्वा यक्षराक्षसपन्नगाः। ऋषयो
मनवो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः। अस्त्रा
ण्यस्त्राणि राजानो वाहनानि च। औषधानि चरत्नानि कालस्यावयवाश्च ये॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते त्वामभिषिंचंतु सर्वकामार्थ
सिद्धये। तच्छं योरावृणीमहइति। ततो यजमानस्नात्वा शुक्लगंधमाल्यांबरधरः ४९

कुर्यादिति नाम्नाचमंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंशतिरेव च॥ होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच॥
मंत्रेणानेनविद्वान्ब्राह्मणायप्रदापयेत्॥ आददेवममस्कृष्णंसप्तसप्तिर्दिवाकरः॥ तारयेतास्त्वास्मामस्मात्संसा
रसागरात्॥ व्रतेनानेनराजेंद्रनवदारोग्यमुत्तमं॥ द्रव्यसंपत्सुतप्राप्तिरितिपौराणिकाविदुः॥ अपिसंवाहिनी
वयंज्ञातिःपुष्टिःसदास्तुते॥ सूर्यपीडासुघोरासुकृताशांतिःशुभप्रदा॥ अथचंद्रशांतिर्ग्रहशांतिस्तत्रैव॥ तद्वि
त्रासुसंगृह्यसोमवारेविचक्षणः॥ अनेनैवक्रमविधिनाकुर्यात्पूजांविधानतः॥ सप्तमेतुततःप्राप्तकु
र्याद्ब्राह्मणभोजनं॥ कांस्यपात्रंयथासंस्थाप्यसामंरजतसंयुतं॥ श्वेतवस्त्रंयुगच्छत्रंश्वेतपुष्पैःप्रपूजितं॥ पादु
कोपानच्छत्रभाजनासनसंयुतं॥ होमंघृततिलैःकुर्यात्सोमनाम्नाचमंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंशा
तिरेवा॥ होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच॥ दध्नःशिखरंकृत्वाब्राह्मणायनिवेदयेत्॥ मंत्रेणान
नराजेंद्रसम्यक्कृततपासमन्वितः॥ महादेवजातिवल्लीपुष्पगोक्षीरपांडुर॥ सोमसोम्यान्नवास्माकंसर्वदा
तनमोनमः॥ अथमंगलशांतिः॥ स्थात्यामंगारकंदृष्ट्वाक्षमायांनक्तभोजनं॥ क्षमाभूः॥ सप्तमेत्वथसंप्राप्ते
हेमंताम्रनिवस्त्रवै॥ रक्तवस्त्रयुगच्छत्रंकुंकुमानुलेपितं॥ निवेद्यनक्तबलिपुष्पधूपास्तादिभिः॥ होमंघृ
ततिलैकुर्याल्कुंजनाम्नाचमंत्रवित्॥ तमिधोष्टोत्तरशतमष्टाविंशतिरेववा॥ होतव्यामधुसर्पिभ्यांदध्नाचै

PAGE(S)MISSING

NOT AVAILBLE

FOLIO NOS.

50-51

वच्चेतनच॥मंत्रेणानेनतंस्थाङ्गुलणायकुठंबिणे॥कुजकुप्रचोपित्वंमंगलःपरिपठ्यसे॥अमंगलंनिहं
न्मासुसर्वदापछमंगलं॥एवंकृतेनोमकृतंदुःकृतं॥शांतिमाप्नुयात्॥कर्तव्यंनोमपीडासुतस्मात्प्रयतमानसैः॥
अथबुधशांतिं॥विशाखासुबुधंपूज्यसप्तनक्तान्यथाचरेत्॥बुधहेममयंकृत्वास्थापितंकांस्यभाजने॥
शुक्लवस्त्रयुगछत्रंशुक्लमाल्यानुलेपनं॥गुडौदनोपसंहारंब्राह्मणायनिवेदयत्॥बुधत्वंबुद्धिजनकोबो
धवान्सर्वदाचृणां॥तत्वाबोधंकुरुमेसोमपुत्रनमोनमः॥हमंघ्रततिलैःकुर्याद्बुधनाम्नाचमंत्रवित्॥
समिधोष्टोत्तरशतमष्टाविंशतिरेवा॥होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच॥बुधशांतिरियंप्रोक्ता
बुधवैकृतनाशिनी॥बुधदोषेषुकर्तव्यातथाशांतिकपौष्टिके॥अथगुरुशांतिः॥
गुरुंचैवानुराधासुपूजयेत्कितानरः॥पूर्वोक्तेनविधानेनसप्तनक्तान्यथाचरेत्॥हेमंहेममयंप्रास्थ
पयित्वाकलस्यतिं॥पीतांबरयुगंछत्रंपीतयज्ञोपवीतिनं॥पादुकोपानहछत्रकमंडलुविभूषितं॥पूजयेत्पी
तकुसुमैःकुंकुमनविलेपितं॥धूपदीपादिभिर्दिव्यैःफलैश्चंदनतंडुलैः॥रवंजकाद्यैपहारैश्चगुरोरग्रनि
वेदयेत्॥धर्मशास्त्रार्थतत्वज्ञज्ञानविज्ञानपारगं॥विबुधार्तिहराचिंत्यदेवाचार्यनमोस्तुते॥होमंघृत
तिलैःकुर्याद्गुरुनाम्नाचमंत्रवित्॥समिधोष्टोत्तरशतमष्टाविंशतिरेवा॥होतव्यामधुसर्पिभ्यांदध्नाचै
वघृतेनच॥समिधोत्रश्वत्थस्य॥हतद्वंसमहापुण्यंसर्वपापहरंशिवं॥तुष्टिपुष्टिकरंनृणांगुरुवैकृतनाश
नं॥विषमस्थगुरोःकार्यामहाशांतिरियंनृभिः॥अथगुरुपूजा॥स्कांदे॥कन्याविवाहकालेतुग्रहैर्यस्या
नविद्धतं॥ब्राह्मणस्योपनयनेयस्यस्याद्दुःस्थितागतः॥दुस्थितीप्राप्तः॥एभिःपूजागुरोःकार्याविधिवन्नृपैः

तंतिलैःकुर्याद्गुरुनाम्नाचमंत्रवित्॥समिधोष्टोत्तरशतमष्टाविंशतिरेवा॥होतव्यामधुसर्पिभ्यां
दध्नाचैवघृतेनच॥समिधोष्टोत्तरशतमष्टाविंशतिरेवा॥होतव्योमधुसर्पिभ्यांदध्नाचैवघृतेनच॥
बुधशांतिरियंप्रोक्ताबुधवैकृतनाशिनी॥बुधदोषेषुकर्तव्यातथाशांतिकपौष्टिके॥अथगुरुशांतिः॥
गुरुंचैवानुराधासुपूजयेत्कितानरः॥पूर्वोक्तेनविधानेनसप्तनक्तान्यथाचरेत्॥हेमंहेममयंप्रास्थ
पयित्वाकलस्यतिं॥पीतांबरयुगंछत्रंपीतयज्ञोपवीतिनं॥पादुकोपानहछत्रकमंडलुविभूषितं॥पूजयेत्पी
तकुसुमैःकुंकुमनविलेपितं॥धूपदीपादिभिर्दिव्यैःफलैश्चंदनतंडुलैः॥रवंजकाद्यैपहारैश्चगुरोरग्रनि
वेदयेत्॥धर्मशास्त्रार्थतत्वज्ञज्ञानविज्ञानपारगं॥विबुधार्तिहराचिंत्यदेवाचार्यनमोस्तुते॥होमंघृत
तिलैःकुर्याद्गुरुनाम्नाचमंत्रवित्॥समिधोष्टोत्तरशतमष्टाविंशतिरेवा॥होतव्यामधुसर्पिभ्यांदध्नाचै
वघृतेनच॥समिधोत्रश्वत्थस्य॥हतद्वंसमहापुण्यंसर्वपापहरंशिवं॥तुष्टिपुष्टिकरंनृणांगुरुवैकृतनाश
नं॥विषमस्थगुरोःकार्यामहाशांतिरियंनृभिः॥अथगुरुपूजा॥स्कांदे॥कन्याविवाहकालेतुग्रहैर्यस्या
नविद्धतं॥ब्राह्मणस्योपनयनेयस्यस्याद्दुःस्थितागतः॥दुस्थितीप्राप्तः॥एभिःपूजागुरोःकार्याविधिवन्नृपैः

न्नाविते:॥मंदंतीकामपुष्पाणिपत्रंपात्रान्नासर्षिपा:॥मंदंतीयूथिका॥कामदमन:॥गुडूचीवास्वपामार्ग
विडंगंशंखीनीवचा॥सहदेवीविषुक्रांतासर्वौषध्य:शतावरी॥कुष्ठंमांसीहरिद्रेद्वेमुरानलदचंदनं॥
वचाकर्चोरमुस्तेचसर्वौषध्य:प्रकीर्तिता:॥तथैवाश्वत्थंनंगाश्वंपंचगव्यंजलंतथा॥नूतनंसोदकुंभंच
पीतवस्त्रसमन्वितं॥पंचरत्नैःसमायुक्तंरत्नान्यांस्थापीतनचत्॥याओषधीरितिमंत्रेणसर्वास्तत्रंचिनि
क्षिपत्॥कुंभस्योपरिन्यागतुस्थापयित्वाबृहस्पतिं॥सुवर्णपात्रंसौवर्णंप्रतिमांतुसुधिष्ठिरः॥कारय
तुयथान्यायाद्वित्तशाठ्यविवर्जितः॥पीतवस्त्रयुगच्छन्नांपीतयज्ञोपवीतिनीं॥पूजयेदंधपुष्पाद्यैस्त
तोहोमंसमाचरेत्॥समिधोश्वत्थबृहत्स्यस्रोतव्याष्टोत्तरंशतं॥तिलव्रीहियवान्निश्रंहोतव्यंचयथाक्र
मं॥बृहस्पतिमंत्रेणऋषिछंदःसमन्वितं॥मंत्रेणानेनजुहुयाद्वान्यपूर्वंचयत्नतः॥ततोहोमावसान
तुपूजयेच्चबृहस्पतिं॥पीतगंधैस्तथापुष्पैर्धूपैर्दीपैश्चशक्तितः॥दध्योदनंचनैवेद्यंफलंतांबूलसंयुतं॥
मंत्रेणानेनकोतयसमभ्यर्च्यपुनःपुनः॥नमस्तेंगिरसांनाथबाक्पतेचबृहस्पते॥क्रूरग्रहैःपीडितानामस्म ग्रम
तायनमोनमः॥पूजयित्वासुराचार्यंपश्चादर्घ्यंनिवेदयत्॥गंभीरदृढारूपांगदेवज्यसुमतप्रज्ञा॥नम ५३

लेवाक्यतश्चांतद्यहाणार्घ्यंबृहस्पते॥अर्घ्यमंत्रः॥अर्घ्यंदत्वासुरेशस्यजपेहोमंसमापयेत्॥ततश्चायेत
सुराचार्येहोमपूजादिसंकृतं॥तत्वंगृहाणशांत्यर्थंबृहस्पतेनमोनमः॥संकल्पमंत्रः॥मंत्रेणाननसंकल्प्य
पश्चात्संपार्थयेन्नृप॥जीवोबृहस्पतिःसुरिराचार्योगुरुरंगिरः॥वाचस्पतिर्दयमंत्रीशुभंकुर्यात्सदाममः॥
प्रार्थनामंत्रः॥एवंसंप्रार्थयेद्वंआचार्यंचप्रपूजयेत्॥सर्वोपचारसंयुक्तांप्रतिमांतांसुधिष्ठिरः॥प्रणम्यचग
वासुक्तामाचार्यायनिवेदयेत्॥अथाचार्यस्तुनियतोवेदवेदांगपारगः॥यजमानंसपत्नीकंशांतचित्तंजि
तेंद्रियं॥कुंभोदकंगृहीत्वातुमंत्रैरेतैःप्रपूजयेत्॥इदमापोथमंत्रेणतामग्निमचातथा॥याओषधीरश्वाव
तीकृष्णेऽश्वानिषेचयेत्॥पश्चात्संप्रोक्षयेद्विप्रान्यथाशक्तयासुधिष्ठिरः॥एवंकृत्वागुरोःपूजांसर्वान्का
मानवाप्नुयात्॥संक्रांतावपिकोतेयतथास्वाच्युदयेशुच॥कुर्वंबृहस्पतेःपूजांअनिष्टक्लमाप्नुयात्॥सं
क्रांतागुरुसंक्रांता॥इतिगुरुपूजा॥अथशुक्रशांतिः॥नत्विज्य॥शुक्रंज्येष्ठासुसंपूज्यसमार्थोनकुंभजं॥स
मभ्यर्च्य॥गुरूक्तक्रममार्गेणद्विजसंतर्पणंचच॥सक्षमत्वथसंप्राप्तेरोप्यंशुक्रंतुकारयेत्॥वंशपात्रंचसंस्था
प्यपूजयेसितपंकजैः॥तदन्नावसितैःपुष्पैस्तांबूलेनाथचंदनैः॥अयंतस्यप्रदातव्यंपायसंघृतसंयुतं॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

दद्यादनेनमंत्रेणब्राह्मणायकुंडविने॥ जागर्वजगः शुक्रश्चशुचिःशुभविग्रहः॥ हत्वाग्रहकृतादोषान्आयु
रारोग्यदास्कृतः॥ होमंघृततिलैःकुर्याशुक्रनामाचमंत्रवित्॥ समिधोसातरशतमश्वत्थविग्रतिरेववा॥ हातव्या
मधुसर्पिभ्यांदध्नाचैवघृतेनच॥ ॥अथप्रतिशुक्रादेःशांतिःतत्रैवमातय॥ अथातःशृणुभूपालत्र
तिशुक्रप्रशांतये॥ यात्रारंभवसानेचतथाशुक्रेदयसति॥ शुक्रपूजाप्रकर्तव्यातनीशामयभारत॥ राज
तेवाथसौवर्णेकांस्यपात्रेयथापुनः॥ शुक्लपुष्पांबरयुतेश्वततंडुलपूरिते॥ निधायराजतंशुक्रंश्वि
मुक्ताफलान्वित॥ महाश्वेतसमायुक्तंसामगायनिवेदयेत्॥ नमस्तेसर्वलोकेशनमस्तेसुरनाय
नं॥ कविसबीजसिध्यर्थंमहाणाध्यनमोस्तुते॥ दद्यैवमर्घ्यंकौंतेयप्राणिपत्यविसर्जयेत्॥ एव
शुक्रोदयःकार्यो यात्रादृष्टफलारत॥ तद्वदेहदर्शमेकेमांप्रनक्ष्यामियुधिष्ठिर॥ सौवर्णं
पद्मसौवर्णंसमदेशपुरोहित॥ पीतपुष्पांबरधरंकृत्वास्नात्वाथसर्षपैः॥ पलाशाश्व
त्थसंगेनपंचगव्यतिलेनतु॥ भंगःपल्लवः॥ पीतांगरागवसनोघृतहोमंतुकारयेत्॥ प
ण्यतांगवासार्थंब्राह्मणायनिवेदयेत्॥ नमस्तेगिरसांनाथवाक्पतेतेबृहस्पतिः॥ कू
रयहेःपीडितानांशमतायनमोनमः॥ इत्यर्घ्यमंत्रः॥ संक्रांतावपिकौंतेययात्रास्वभुद्ध

DR BHAU DAJI LIBRARY